अंबा कुप्यति तात मूर्ध्नि विधृता गाङ्गेयमुत्सृज्यतां विद्वन्षण्मुखका गतिर्मम चिरं मूर्ध्नि स्थिता या वद कोपावेशवशा
दृशेषवदनैः प्रत्युत्तरं दत्तवान्पाथोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ६२ माध्वीके विधुमण्डले वरवधूवक्रे
न्वगीतान्तरे सत्केवक्र चतुष्टये दृशमुखो विज्ञापितस्तच्चरैः बद्धोऽसाविति चेतरैर्भयवशादूचे वचः संभ्रमात्पाथोधिर्जल
धिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ६३ पीतस्त्वं कलशोद्भवेन मुनिना ध्वस्तोऽसि देवासुरैराबद्धोऽसि च राघवेण सुदु
नाशाखामृगैर्लङ्घितः नाम्नामारभरीतथैव भवतो लोकैरि यं घुष्यते पाथोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः
६४ तत्तुं पर्वतसन्निभेन कपिना लीबूकृतां वक्षसि क्षिप्रं वीक्ष्य निमज्जतीमथ तव स्पृष्टास्तरन्तीः शिलाः लोके नृत्यपरे
विभीषणजने सेत्याह सेतूद्यमे तुम्बी मज्जति संतरन्ति दृषदः प्रेतो दिवा नृत्यति ६५ त्वं नो गोत्रपतिस्तवेन्दुरधिपस्तस्या
मृतं त्वत्करे तेन व्याधशराहतां प्रणयिनीमेनां पुनर्जीवय इत्यूर्ध्वं गगने निशापतिमृगे कारुण्यमातन्वतः शङ्काग्राद्पतन्मृ
गस्य रुदतो बाष्पाम्बु भूमण्डले ६६ उन्नादाम्बुदवर्धितान्धतमसि प्रभ्रष्टदिङ्मण्डले कालेयामिकजाग्रदुग्रसुभट
व्याकीर्णकोलाहले कर्णस्यासुहृदर्णवाम्बुवडवावह्न्येर्यदन्तःपुरादाभातासि लदम्बुजाक्षि कृतकं मन्ये भयं योषितं ६७
उग्रग्राहमुदन्वतो जलमतिक्रामत्यनालम्बने व्योम्नि क्राम्यति दुर्गमा क्षितिभृतां मूर्धनि मारोहति व्यासं याति विषाकुलै
रहिकुलैः पातालमेकाकिनी कीर्त्तिस्ते मदनाभिराम कृतकं मन्येभयं योषितं ६८

भयं योषितं इति समस्या ६८

कुर्वाते कुरुते करोति कुरुतः कुर्वत्यलं कुर्वते इतिसमस्या ६९ कुर्वाते कुरुते करोति कुरुतः कुर्वान्ति कुर्वान्तिच इतिसमस्या ७० सूच्यग्रे कूपषट्कं तदुपरिनगरीतत्र गंगाप्रवाहः इतिसमस्या ७१ ७२ ७३ शीर्षाणां सेववन्ध्या ममनवतिरभ्रूल्लोचनानामशीतिः इतिसमस्या ७४ शीर्षाणां शेषवन्ध्यातवनवतिरभ्रूल्लोचनानां

चित्रंनर्त्तनमम्बरंशिखरिणोशीतांशुबिम्बेतमः संचारंजलजंकपोतरणितं कामागमप्रक्रिया मीनौविद्युतितारकंवि हरणंज्योत्स्नापिकोशाम्बुजेकुर्वातिकुरुतेकरोतिकुरुतः कुर्वत्यलं कुर्वते ६९ यस्यद्वारिसदासमीरवरुणौसंमार्ज नंहव्यवाट्पाकंशीतगुरातपत्रकरणंदस्त्रौप्रतीहारताम् देवोऽस्यविधिंचदास्यममरावर्ण्योदशास्यः कथंकुर्वातेकु रुतेकरोतिकुरुतः कुर्वन्तिकुर्वन्तिच ७० कश्चित्पान्थस्तृषार्तः पथितपनकृतोगम्यमानोऽन्यपान्थंपप्रच्छानन्द लीनोवद्पथिककुतोजह्नुकन्याप्रवाहः तेनासौशीघ्रवाचाप्रचलितमनसाविप्रवर्येणवाचा सूच्यग्रेकूपषट्कंतदु परिनगरीतत्रगंगाप्रवाहः ७१ रामत्वत्कीर्त्तिवृक्षाद्बहुतरममलाउत्थिताः कोरकायेतन्मध्येरुद्ररूपोऽप्यजनि खलुयशः कोरकस्तस्यचाद्ये अस्यश्रोताक्षिकूपास्तदुपरिचशिरस्तत्रचास्तिस्रवन्ती सूच्यग्रेकूपषट्कंतदुपरिन गरीतत्रगंगाप्रवाहः ७२ उद्दामार्कांशुदीप्यद्दिनमणिमाणिभिर्भस्मितान्तेसमन्ताद्वायुव्याधूयमानेज्वलनकणगणा कीर्णधूलिप्रकीर्णे कान्तारेऽस्मिन्नृपार्तेपथिपथिकभवेकापियाथोथतेनासूच्यग्रेकूपषट्कंतदुपरिनगरीतत्रगंगा प्रवाहः ७३ मांसाक्षिकृत्यमुग्धेविजयमभिलषन्स्मरखयामासशंभुर्भूत्वामन्मौलिमालांसदशनवशतीमक्षपातान् विजित्य गौर्यप्यानेस्त्रदृष्टीर्जितनरचनवभूस्तन्विशेषात्तदित्थं शीर्षाणांसेववंध्याममनवतिरभ्रूल्लोचनानामशीतिः ७४ प्रत्येकंदिक्पतीशानिलतपनवसून्सन्नतस्त्वंयथाभूरश्रोषीस्त्वंयथान्वस्वरसहितलसन्मूर्छनागानतानात्स् कृष्णान्यस्तान्यमौलीक्षणवद्वसरेसान्वसाचप्रसादाच्छीर्षाणांशेषवन्ध्यातवनवतिरभ्रूल्लोचनानामशीतिः ७५

मशीतिरितिसमस्या
७५.

शूली शंभुः पिनाकी शिवभवपशुपाः शर्वईशश्चभर्गः इतिसमस्या ७६ इतिसमस्याख्यानाध्यायः अथप्रहेलिकाध्यायमाह अपदेति १ वनेजाता अरण्ये
काष्ठरूपेणोत्पन्ना वनेउदके पण्यस्त्री मूल्यंदत्वाभोग्यास्त्री गणिका द्रव्यदानेन यथाभोग्या तथेयमपीत्यर्थः अस्यश्लोकस्यतात्पर्यः नौकाइत्यर्थः २
गोपालो धेनूनांपतित्वात्पालकः त्रिशूली तप्तत्रिशूलांकितत्वात्तच्चिह्नवान् चक्रपाणिः बाहौतप्तचक्रांकितत्वात्तच्चिन्हवान् अस्यश्लोकस्यतात्पर्यः महोक्षा

इंद्राद्यालोकपालाहरिविधुतपनानागविद्याधराद्याद्वेष्याः सर्वेऽपिदेवाः प्रियतववरदः कोऽस्तिवन्द्योगरीयान् श्रुत्वा
वाचंप्रियायाइतिदृशमुखतः प्राहवाक्यंदशास्यः शूलीशंभुः पिनाकीशिवभवपशुपाः शर्वईशश्चसर्गः ७६ इतिश्रीह
रिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेषष्ठेमिश्रस्कंधे समस्याख्यानिरूपणंनामषट्चत्वारिंशत्तितमोऽध्यायः समाप्तः ४६
श्रीगणेशायनमः अथप्रहेलिकाध्यायः प्रारंभः उक्तंचसुभाषितसंग्रहे अपदोदूरगामीचसाक्षरोनचपं
डितः अमुखःस्फुटवक्ताचयोजानातिसपण्डितः १ वनेजातावनेत्यक्तावनेतिष्ठति पण्येस्त्रीनतुसावेश्यायोजा
नातिसपण्डितः २ गोपालोनैवगोपालस्त्रिशूलीनैवशंकरः चक्रपाणिःसनोविष्णुर्योजानातिसपण्डितः ३ उच्छि
ष्टंशिवनिर्माल्यंवमनंशवकर्पटम् काकविष्ठासमुत्पन्नःपञ्चैतेऽतिपवित्रकाः ४ अनेकसुषिरंवाद्यंकान्तंचऋषि
संज्ञितम् चक्रिणाचसदाराध्यंयोजानातिसपण्डितः ५ वनेवसतिकोवीरोयोऽस्थिमांसविवर्जितः असिवत्कुरुते
कार्यंकार्यंकृत्वावनंगतः ६ रविजाग्निशिकुन्दाभातापहारीजगत्प्रिया वर्धतेवनसंगेननतापियमुनापिन ७ तरुण्या
लिंगितःकण्ठेनितम्बस्थलमाश्रितः गुरूणांसन्निधानेऽपिकःकूजतिमुहुर्मुहुः ८

इत्यर्थः ३ उच्छिष्टमिति दुग्धंगंगा मधु प
ट्टाम्बरं पिप्पलश्च एतेपंचात्यन्तपवित्रंकुर्वन्ति ४ अनेकेति अस्यभावोवल्मीकमिति सुषिरं बिलं वकारोआद्यौयस्य ककारोऽन्तेयस्य चक्रिणा सर्पेण ५ वनेति
कुलालदोरकइत्यर्थः ६ रविजेति तक्रमिति ७ तरुणीति तरुण्यालिंगितः कुम्भःकूपसरोवरादौजलेनभृत्वाशिरस्यारोपणसमयेतरुण्याहस्ताभ्यामालिङ्ग्यतेभर्त्रापि

तरुण्या सोत्कण्ठमालिङ्ग्यते नितंबस्थकमाश्रितः कुम्भो नितम्बस्थाने गृह्यते भर्त्तापि नितम्बस्थाने गुह्यमदेशे निधेहेत् गुरूणां कुम्भो गुरूणां वृद्धघटानामुपर्युपि
विश्य कूजति बरबडायते भर्त्तापि गुरूणां मातृपितृश्वश्रूश्वशुरजनानामग्रे स्त्रियं कामयते कूजति शब्दं करोति अस्य श्लोकार्थः कलशः इति ८ शबरस्त्री पुत्रजाया
याया: स्तनौ गुञ्जाफलालंकृतौ दृष्ट्वा कुतो निःश्वस्य रुरोद यतो मत्पुत्र एतामनुरक्तस्तथा क्षीणतां गतो यथा गजान्विनिहत्य तद्गण्डस्थलमुक्ताफलहारैः स्तनौ वि

अवलोक्य स्तनौ वध्वा गुञ्जाफलविभूषितौ निःश्वस्य रोदितुं लग्ना कुतो व्याधकुटुंबिनी ९ आपाण्डुपीनकठिनं व-
र्त्तुलं सुमनोहरं करैराकृष्यते ऽत्यर्थं किं वृद्धैरपि सस्पृहम् १० एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः क्षीयते व
र्धते चैव न समुद्रो न चन्द्रमाः ११ छत्रधारी न राजासौ जटाधारी न चेश्वरः सृष्टिकर्त्ता न सब्रह्मा छिद्रकर्त्ता न तस्करः
१२ अस्थि नास्ति शिरो नास्ति बाहुरस्ति निरङ्गुलिः नास्ति पादद्वयं गाढमङ्गमालिङ्गति स्वयम् १३ अस्ति ग्रीवा शिरो
नास्ति द्वौ भुजौ करवर्जितौ सीताहरणसामर्थ्यो न रामो न च रावणः १४ नरनारीसमुत्पन्ना सा स्त्री देहविवर्जिता अ
मुखी कुरुते शब्दं जातमात्रा विनश्यति १५ दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः गुणस्यूतिसमृद्धोऽपि परपादे
न गच्छति १६ न तस्यादिर्न तस्यान्तो मध्ये यस्तस्य तिष्ठति तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद १७ य एवादिः
स एवान्तो मध्ये भवति मध्यमः य एतन्नाभिजानीयात्तृणमात्रं न वेत्ति सः १८ पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः
चलते वायुवेगेन पदमेकं न गच्छति १९ श्यामं च वर्त्तुलाकारं पुंनाम च चतुरक्षरम् शकारादि मकारान्तं यो जानाति स प
ण्डितः २० अर्धचन्द्रवदाकारं स्त्रीनामा यच त्र्यक्षरम् नकारादि रिकारान्तं यो जानाति स पण्डितः २१

भूषयितुं नालं अतो निःश्व
यासलभ्यैर्गुञ्जाफलैर्विभूषयति क्षीणे च सति पुत्रे तदर्जितधनर्निर्वाह्यवृत्तिकस्य सर्वस्यापि कुटुम्बस्य जीवितसंदेहः अतो व्याधकुटुम्बिनी दुःखान्निःश्वस्य रोदितुं ल
ग्ना ९ पक्वबिल्वफलं १० सूचिका १२ १३ कञ्चुकः १४ लोटिका १५ उपानत् १६ नयनं १७ पवसंम् १८ १९ २० २१

२३ अननस इत्यर्थः २३ २४ लेखनी इत्यर्थः २५ अशोक इत्यर्थः २६ कुंभकारस्य २७ २८ रजस्वलायतः २९ व्याधः किमप्यद्भुतं गीतं गीत्वा गीतवि मूर्छितविलीनचित्तस्य तरुणहरिणस्य शृङ्गं जग्राह किमर्थम् यतो मद्गीतसुखितस्त्वं याचकस्य मह्यं शिरोदानं देहीति अथ तं च हरिणं शिरोदानायोद्यतकरं समीक्ष्य तज्जायां हरिणीमपि पत्युर्भक्त्या निजशिरोदानायोद्यतकरां समीक्ष्य धर्मार्थचारिणी व्याधिलज्जिता केन हेतुना यतोऽयं हरिणो दाता, इयं च हरिणी पतिभ क्ता दातृजाया, मत्कान्तस्तु याचकः अहं च याचकजाया वरमेते पशवो नच वयं मनुष्याः इत्यभिप्रेत्य लज्जितेति प्रथमोऽर्थः अथवा व्याधजायायाः पूर्वपरि णीतपुरुषो मृतः सच विद्यमानः संगृहीतो द्वितीयः पुरुषः तं च विलोक्य चिंतितवती यतो निजकान्तवियोगासहिष्णुः शिरोदानायोद्यतकरा पतिभक्ता परमियं

अष्टपादश्चतुःकर्णो द्विमुखी द्विमुखस्तथा राजद्वारे पठेद्वीरो न च देवो न राक्षसः २२ वृक्षस्याग्रे फलं दृष्टं फलाग्रे वृक्ष एव च अकारादि सकारान्तं यो जानाति स पण्डितः २३ चतुर्मुखो न च ब्रह्मा वृषारूढो न शंकरः निर्जीवी च निराहारी अ जस्रं धान्यभक्षणम् २४ कृष्णमुखी न मार्जारी द्विजिव्हा न च सर्पिणी पंचभर्ता न पांचाली यो जानाति स पण्डितः २५ अपूर्वोऽयं मया दृष्टः कान्तः कमललोचने शोऽन्तं यो विजानाति स विद्वान्नात्र संशयः २६ पर्वताग्रे रथारूढो भूमौ तिष्ठ ति सारथिः चक्रवद्भ्रमते पृथ्वी तस्याहं कुलबालिका २७ अर्धचन्द्रसमायुक्तं पुंनाम चतुरक्षरम् ककारादि ककारान्तमि हृ जानाति पण्डितः २८ अनुनेतुं मानिन्या दयितश्चरणे सरागचरणायाः यावत्पतितः स तया तत्क्षणमवतारितः क स्मात् २९ गीत्वा किमपि व्याधः शृङ्गं जग्राह तरुणहरिणस्य तमथ समीक्ष्योद्यतकरमेणीमपि लज्जिता व्याधी ३०

हरिणी

अहं च परिणीतप्रियमरणेऽपि जीविता संगृहीतभर्तृका चासती मानुषी इति लज्जितेति द्वितीयोऽर्थः अथवा इति चिन्तितं तया यतो येन कर्णेन गीतं श्रुतं तस्य दातुः कर्णस्य पुरो यांचायै करो न प्रसारितो व्याधेन नीरसकठिनकुटिलस्य शृङ्गस्य तु पुरः प्रसारित इत्यनुचितं कृतं मूढेन कृतेऽप्यनौचित्ये स्वयं मृगयूथपतिर्गीति रसज्ञोऽकृतपात्रविचारः स्वमानकृपणं याचकं जानन्निजशिरोदानायोद्यतकरो जातः अतो व्याधिलं हरिणं चतुरं ज्ञात्वा तं च व्याधं मूर्खं ज्ञात्वैणी चैतादृशचतुरपति वलीत्वेन सुभगां संभाव्य लज्जितेति तृतीयोऽर्थः ३०

पतोऽयं गीतप्रियोमृगाङ्कः मृगोमत्प्रयुक्तंगीतमाकर्णयितुं चन्द्राद्वेदवतरेत्तदा चन्द्रोनिःकलङ्कः स्यात् तेनमन्मुखसाम्यंचलभेत प्रियविप्रयोगेचसंतापकरोमेहिमांशुः अतोऽस्य

काचिन्मृगाक्षीप्रियविप्रयोगेनिशीथिनीपारमपारयन्ती आगातुमादायकरेणवीणामुङ्कीवमालोक्यशनैरहासीत् ३१ सदारि
मध्यापिनवैरियुक्तानितान्तरक्तापिसितैवनित्यम् यथोक्तवादिन्यपिनैवदूतीकानामकान्तेतिनिवेदयाशु ३२ वृक्षाग्रवा
सीनचपक्षीराजस्त्रिनेत्रधारीनचशूलपाणिः त्वग्वस्त्रधारीनचसिद्धयोगीजलंचबिभ्रन्नघटोनमेघः ३३ वृक्षाग्रवासीनच
पक्षजातिस्तृणंचशय्यानचराजयोगी सुवर्णकायानचहेमधातुः पुंसश्चनाम्नानचराजपुत्रः ३४ नाहंमनुष्योनचदेवय
क्षोनब्राह्मणक्षत्रियवैश्यशूद्रः नब्रह्मचारीनगृहीवनस्थोभिक्षुर्नचाहंनिजबोधरूपः ३५ चक्रीत्रिशूलीनहरोनविष्णु
र्महान्बलिष्ठोनचभीमसेनः स्वच्छन्दचारीनृपतिर्नयोगीसीताविरयोगीनचरामचंद्र ३६ आद्येनहीनाजलधावदृश्यम
ध्येनहीनंभुविवर्णनीयम् अंतेनहीनंध्वनतेशरीरंहेमाभिधाःसप्रियमातनोतु ३७ सर्वस्वापहरोनदस्युकुलजःखड्गाङ्ग
भृन्नेश्वरोदोषानिष्करोनधर्मनिरतःकीलालपोनासुरः नृणांपृष्टपलायनोनपिशुनःशीघ्रंगमोनोहयःशश्वद्रात्रिचरो
नराक्षसगणःकोऽयंसखिब्रूहिमे ३८ सर्वस्वापहरोनतस्करगणोरक्षोनरक्ताशनःसर्पोनैवबिलेशयोऽखिलनिशाचारी
नभूतोऽपिच अंतर्धानपटुर्नसिद्धपुरुषोनाप्याशुगोमारुतस्तीक्ष्णास्योनतुसायकस्तमिहजानन्तितेपण्डिताः ३९ जा
तास्मुद्धकुलेजघानपितरंहत्वापिशुद्धापुनःस्त्रीचैषावनितापितैवसततंविश्वस्ययाजीवनम् सङ्गंप्राप्यपितामहेनजनकं
प्रासूतपाकन्यकाखासर्वैरपि वंदिताक्षितितलेसानामकानायिका ४० इतिश्रीहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेषष्ठे
मिश्रस्कंधेप्रहेलिकानिरूपणंनामसप्तचत्वारिंशतितमोऽध्यायःसमाप्तः ४७

शशोश्चन्द्रमसोमन्मुखसाम्यंमाभूयादित्याशयेनवीणाम
हासीदित्यर्थः ३१ रिमध्या रिकारोमध्येयस्याः । सिता सकारेणेतायुक्ता। कान्ता ककारोन्तेयस्याःसारिकाइत्यर्थः ३२ नारिकेलफलमितिभावः ३३ आम्रः ३४ नृपमः ३५
३६ कलजः ३७ मत्कुणः ३८ ३९ ४० इत्यध्यायःसमाप्तः

श्रीगणेशायनमः अथापह्नुत्याध्यायप्रारंभः वदंतीति १ २ हेमनः हेमन्तसंबंधी ३ अपतितया पतिंविना (पक्षे) पतनाभावेन । पिच्छिलः पंकिलः ४ ५ धूतोर्णा धूतोर्णादिदशा (पक्षे) धूतोर्णवस्त्रा (सुदती शोभनादन्तायस्याःसा (पक्षे) हस्तिदन्तनिर्मितालंकारवती ६ रागी अनुरक्तः (पक्षे) रक्तवर्णः ७ पामा कण्डूः ८ मेघं

श्रीगणेशायनमः अथापह्नुत्याध्यायःप्रारंभः उक्तंचसुभाषितसंग्रहे वदन्तीजारवृतान्तंपत्यौधूर्तासखिधिया
पतिंबुध्वासखिततःप्रबुद्धास्मीत्यपूरयत् १ रुचिरस्वरवर्णपदारसभावतीजगन्मनोहरति तत्किंतरुणीनहिनहिवा
णीबाणस्यमधुरशीलस्य २ सीत्कारंसंजनयतिव्रणयत्यधरंतनोतिरोमाञ्चम् नागरिकःकिंमिलितोनहिनहिसखि
हैमनःपवनः ३ कालेपयोधराणामपतितयानैवशक्यतेस्थातुम् उत्कण्ठितासिबालेनहिनहिसखिपिच्छिलःपंथाः ४
प्रहरतिनपंचबाणःकेवलमबलेनिमेषोऽपि वर्षतिपरंनदेवःक्षणदायीविप्रयोगंते ५ मधुरस्वनाधूतोर्णामण्याभरणा
सुशोभनासुदती मत्स्कन्धोचितदण्डाभिक्षोदयितास्तिकिंनमेवीणा ६ रागीभिनत्तिनिद्रांतल्पंनजहातिनिष्ठुरंदशति
चतुरेकिंप्राणेशोनहिनहिसखिमत्कुणव्रातः ७ आदौगृहीतपाणिःपश्चादारूढजघनकटिभागा नरवमुखलालनसु
खदासाकिंरामास्तिनैवभोपामा ८ नाथविलोकयमेघंनहिपापंत्वातिपुण्यायाः नहिकथयामिपयोधरमपसारयकंचु
कीमुरसः ९ पंचदशीरजनिसभानारामणिभूषणापिकोकिलवाक् चंद्रसभागतवसनाहस्तगतास्तीनमेवीणा १० नाथमयू
रोनृत्यतितुरगाननवक्षसःकथंनृत्यम् नहिकथयामिकलापिनमिहसुकलापि प्रियेकोऽस्ति ११ अम्बरमेचीभाजःसा
लंकारस्यचारुवृत्तस्य किंब्रूमोसखियूनोनहिनहिसखिपद्यबन्धस्य १२ इहपुरोऽनिलकम्पितविग्रहामिलतिकानव
नस्पतिनालता स्मरसिकिंसखिकान्तरतोत्सवंनहिघनागमरीतिरुदाहृता १३ इतिश्रीबृ॰बृ॰मि॰अपह्नुतिनि॰अध्या॰स॰४८

अंबुदम् (पक्षे) मेऽधंपापम् । पयोधरंमेघम् (पक्षे) स्तनम् ९ १० मयूरः मेरूरः इतिपदच्छेदः ११ १२ १३ इतिश्रीबृ॰बृ॰नि॰अपह्नुतिनि॰ अष्टचत्वारिंशत्तमोध्यायः समाप्तः ४८

यह पुस्तक निजाम शहर औरंगाबादमे श्रीगायत्रीमंदिर विद्याप्रकाशछापखानामे पंडित हरिकृष्णाचंकररामकेपासमिलेगा किंमत ६३॥

श्रीगणेशायनमः वृषवाहनविघ्नेशौहंसवाहंसरस्वतीं स्येदंश्रीबटुकंनत्वाषितंव्यंकटंततः १ श्रीगोतमकुलोत्पन्नोज्योतिर्विद्व्यंकटात्मजः हरि
कृष्णःकरोत्यत्रदेवतावासनिर्णयं २ अथतत्रादौश्रीसरस्वतीअधुनाकुत्रनिवसतितमाह उक्तंप्रश्नभैरवे प्रयोजनंविद्यारंभमुहूर्त्ते प्रश्नस्येषु
क्जन्मभमंकभक्तंशून्येकशेषेदिविपंचपाद्ववेदैः अधः पृथिव्यांकरराम२।३शेषेयत्रास्तिवाणीकिलतत्रविद्या ३ अथबृहस्पतिश्चाधुनाकुत्रनि
वसतितमाह उक्तंतत्रैवप्रयोजनंपूर्वोक्तमेव जन्मभंप्रश्नतिथ्यर्क्षयुक्तंभक्तंरसैःफलं शून्येक०।१शेषेस्वर्गस्थःपृथ्विस्थोद्वित्रि२।३शेषके४
पंचाब्धि५।४शेषेपातालेयत्रतिष्ठतिवाक्पतिः तत्राध्ययनकर्तुश्चविद्यापूर्णाभवेत्तदा ५ अथश्रीकामदेवश्चाधुनाकुत्रनिवसतितमाह उक्तं
तत्रैवप्रयोजनं कन्यारुढाभप्रश्ने प्रथमस्त्रीसंभोगगर्भाधानमुहूर्त्तंच प्रश्नाहभघ्नंनिजजन्मऋक्षंरामैर्विभक्तंफलमत्रशेषे एकावशेषे मदनो
दिविस्थोद्विशेषकेमानवलोकसंस्थः ६ शून्यावशेषेबलिसद्मसंस्थोस्यान्मन्मथःप्रश्नदिनेचलोके विवाहकंकौतुकमाप्नुवेद्यंयत्रैवसंस्थो
गदितंचतत्र ७ अथदेवर्षिनारदश्चाधुनाकुत्रनिवसतितमाह उक्तंचप्रश्नदीपिकायां प्रयोजनं विवाहादिमुहूर्त्तेविवादकरणेच शुक्लादितिथ्यो
गतवासराढ्यानंदैर्युताराभविभाजिताश्च एकावशेषेसुरराजलोकेस्यान्नारदोमानवकेद्वितीये ८ त्रिशेषकेभोगिपुरेनिवासस्तत्रैवयुद्धंखलु
कुयत्रसंस्थः विवाहमौंजिप्रभृतीषुलोकसमूहकार्येकिलवर्जनीयः ९ अथप्रकारांतरेणनारदनिवासः उक्तंचज्योतिःसागरे सूर्यभाच्च
न्द्रनक्षत्रंगणयेत्त्रिर्विभाजितं एकेनस्वर्गलोकस्थःद्वाभ्यांपातालगःस्मृतः १० त्रिशेषेमानवेलोकेनारदस्यास्थितिंवदेत् नारदोयत्रवसतित
त्रनूनंकलिर्भवेत् ११ अथमहालक्ष्मीनिवासः प्रयोजनं यात्रादिषु नागाद्रि७।८तिथिसंयुक्तवसुभिर्भागमाहरेत पूर्वादिक्रमतोशेषेलक्ष्मी
वसतितद्दिशि १२ अलक्ष्मेर्निवासः प्रयोजनंतदेव द्वौरिंदु१पतिथिसंयुक्तंवसुभिर्भागमाहरेत् पूर्वादिक्रमतोशेषेअलक्ष्मीर्वासउच्यते १३ एतत्
स्थिफलंज्ञेयंसामान्यगमनादिषु नान्यत्रविदुषायोज्यंयतोनात्रविशेषता १४ अथश्रीमद्भगवान्सदाशिवः अधुनाकुत्रनिवसतितमाह उक्तंज्यो
तिःसागरे तिथिंचद्विगुणीकृत्यंपंचभिःसहमिश्रितां सप्तभिस्तुहरेद्भागंशेषांकेशिवउच्यते १५ एकशेषेतुकैलासेद्विशेषेगौरीसन्निधौ त्रिशेषेवृष
भारूढोसभायांचचतुर्थके १६ पंचमेभोज्यशालायांषष्ठेक्रीडाख्यमंदिरे शून्येश्मशानभूम्यांवैशिववासोपिनिर्दिशेत् १७ कैलासेचसुखंज्ञेयंतथैव

गौरीसन्निधौ वृषारूढेयशप्राप्तिःसंभासंस्थेश्रियंलभेत् १८ भोज्यासिभोज्यिशालायांक्रीडासंतापकारिणी शून्यंमृत्युकरंज्ञेयंरिचवासिफलंविदुः १९
अथाग्निनिवासज्ञानं उक्तंज्योतिषरत्ने प्रयोजनंहोमकर्मणि सैकातिथिर्वारयुताकृताप्ता शेषेगुणेभ्रे ३।०भुवियह्निवासः सौख्याय होमेशशियु
ग्म१।२शेषेप्राणार्थनाशोदिविभूतलेच २० प्रकारांतरमाह मुंजादित्यनिबंधे भारमष्टादश१८गुणं तिथिवारसमन्वितं द्विपं७संख्यासमायुक्तंचतु
र्भिर्भागमाहरेत् २१ एकशेषेभवेत्स्वर्गेपातालेचद्विशेषके शून्यत्रिशेषेभूमौचवैश्वानरस्थितिंवदेत् २२ अथचंद्रनिवासस्थानं उक्तं ज्योतिःसा
गरे प्रयोजनंयात्रायां मेषादिराशिसंख्यासुतिथिवारर्क्षसंयुतिः वन्हिभिस्तु३हृतेभागेएकेजलगतोभवेत् २३ द्वाभ्यांस्थलगतोज्ञेयः स्वर्गेशू
न्येनसंशयः स्वर्गलोकेयदाचन्द्रःसर्वकार्यशुभावहः २४ अथभद्रानिवासज्ञानं उक्तंतत्रैव प्रयोजनंसर्वशुभकर्मणि मीनेमेषालिकर्के शशिनी
निवसति स्वर्गलोकेचविष्टिः कन्यायांतौलिसंस्थे धनुषिमिथुनगेनागलोकेनिवासः कुंभेसिंहे वृषेवामकरमुपगतेराजतेमृत्युलोके तत्रस्थंद्रप्रभा
वाद्विमकरतनयानोशुभालौकिकेचेत् २५ स्वर्गेभद्राभवेत्सौख्यंपातालेचधनागमः मृत्युलोकेयदाभद्राकार्यसिद्धिस्तदानहि २६ अथ
नवग्रहाणांसमयावस्थामाह उक्तंकालामृतादिषु प्रयोजनं विवाहादिसर्वमुहूर्तेषु ग्रहाणांशुभाशुभफलनिर्णये जातके दशाफलनिर्णयेच
तत्कालरव्यादिग्रहस्फुटेषुसर्वत्रसंशोध्यतमस्फुटंच तच्छेषराश्यादिकलीकृतेषु देवेन५८शेषःसमयोग्रहाणां २७ अर्थः- ग्रहान्स्पष्टान्कृ
त्वा सर्वेभ्यो राहुं निष्कास्यशेषाणांराश्यंशानां कलाकार्याअष्टचत्वारिंशद्भक्ते शेषानन्यमाणाऽवस्थाज्ञेया २७ तांबूलंदर्पणालस्येचलनंदंतधाव
नं स्नानमाच्छादनंजाप्यंहोमोदेवार्चनंतथा २८ राज्याधिकारोभुक्तिश्चाप्यालस्यंशयनंसुखं दारसंभाषणंपुत्रलालनंगानमेवच २९ शत्रुपीडामन
स्तापःपरानयकुतूहले मोहालस्येचनिद्राचनिद्राराहित्यमुत्सुके ३० लीलाविनोदसंग्राममूर्छालस्यपरिभ्रमाः निद्रालस्यातिमोहाश्चपरिवारा
दिभाषणं ३१ युक्तिसाधनतांबूलेपरिहासविलासनं इंद्रपूर्णागमंकलांतरद्यूतसुखभाषणं ३२ नटनर्तकसंगीतकोलाहलमहोत्सवः हारकेयूरकट
ककीरीटमुकुटादिकं वस्त्रभूषणसंप्राप्तिर्बहुद्विजसमागमः महोल्लासंमहोत्साहएवंसमयनिर्णयः ३४ अथप्रकारांतरेणनवग्रहाणांसमयाव-
स्थानिर्णयः दंतधावनमश्विन्यांभरण्यांवस्त्रभूषणं कृत्तिकायांतथादानंसंध्यावंदनमाजने ३५ मृगशीर्षेतथानिद्राआर्द्रायांध्यानमेवच पुन

वेस्वांतथास्नानंपुष्येभोजनमेवच ३६ आश्लेषायांराज्यलाभोमघायांदानमेवच चिंतास्यात्पूर्वफाल्गुन्यांहोमश्चोत्तरफाल्गुने ३७ लक्ष्मीपूजा
तयाहस्तेचित्तायांचित्तहर्षणं स्वात्यामातिथिभुक्तिश्चतांबूलंस्यात्द्विदैवते ३८ राधायांराजपूजाचज्येष्ठायामरितोभयः मूलेचपूजासमयःपूर्वा
यामरिसंगमः ३९ गंधाद्योचोत्तराषाढ्यांश्रवणेरतिसंभ्रमः राज्याधिकारोवसुभेसंतोषःशतभेतथा ४० भूषास्यात्पूर्वभाद्रायांअहिर्बुध्न्ये
तिजागरः रेवतिमतिनिद्रास्यादेवंसमयनिर्णयः ४१ अथसूर्यादिनवग्रहाणांमूकादिषड्विधावस्था संशोध्यसूर्यलग्नाञ्च सूर्यचन्द्रादिकान्ग्रहा
न् राशिशेषेचषड्भक्तेशेषेणफलमादिशेत् ४२ एकशेषेभवेन्मूको द्विशेषेबाधिरःस्मृतः जडःप्राज्ञश्चादिव्यश्च विचक्षणइतिक्रमात् ४३ अर्थ- लग्न
माथिसूर्यनेहीनकरिसेशराशिने ६नोभागलेवोशेष१रहेतोमूक ६शेषरहेतोविचक्षण चंद्रादिक ग्रहोनेसूर्यमाथिकाढवाफलतेजप्रमाणे अथवास्प
ष्टलग्नमाथिस्पष्टसूर्यनेहीनकरियाशिअंशकलावोनेसर्वनेविकलाकरिनेछयेभागलेनेशेषनुफल ४३ अथदेवसुप्तःजाग्रतोयेनिज्ञानं प्रयोजनं
देवप्रतिष्ठामुहूर्त्ते देवनक्षत्रमारभ्यदिननक्षत्रगण्यते ऋतुभिश्चहरेद्भागंशेषेणदेवमादिशेत् ४४ एकेननिद्रितोदेवोद्वितीयेजाग्रतस्तथा तृतीये
वाहनारूढश्चतुर्थेपृष्ठतोभवेत् ४५ पंचमेस्वर्गलोकस्यषष्ठेमृत्युस्थितोवदेत् अथफलं निद्रायांचभवेद्धानिर्जाग्रतेसुखसम्पदः ४६ आरूढेचाग्नि
यःप्राप्तिःपृष्ठतोमरणंध्रुवं स्वर्गलोकेभवेत्सौख्यं मृत्युलोकेचमृत्युरः ४७ इतिश्रीहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेषष्ठेमिश्रस्कंधेदेवता
निवासनिरूपणंनामत्रयस्त्रिंशत्तितमोऽध्यायःसमाप्तः॥ ॥

अथाध्यायविषयाः

॥ इतिश्रीदेवतावासनिर्णयाध्यायः समाप्तः ॥

अथबृह० मिश्रस्कंधेशस्त्रलक्षणाध्यायः प्रारंभः ७०॥

श्रीगणेशायनमः वृषेति द्वाभ्यांमंगलमिति १ २ वक्ष्यइतिशेष: ३ अथनुरनसन्नाहखेटकधारणमुहूर्त्तमाह विश्वेति संतः पण्डिताः नव्यवर्मफलकाधृतिंनूतनस
न्नाहखेटकयो: आधारणमाहु: फलकंटाल इति भाषाकस्मिन् ईज्यो गुरुः षण्मुखेयस्यसद्वारचतुष्कंगुरुशुक्रशनिसूर्यानांचतुष्कइत्यर्थ: पुनःकेविश्वेति विश्वकृचित्रा
सुरसवित्री अदिति: पुनर्वसु: अजोविष्णु: श्रवण: मित्रोऽनुराधास्तोमेन यज्ञेनशाः रदाःदंता: यस्यसपूषातस्य भद्वयंरेवत्यश्विनौ धीरसंज्ञानि एषांद्वंद्वे एभिर्भै: ४ अथसन्नाह
धारणेलग्नशुद्धिमाह साधुइति नापुरुषोऽहितगणान् रिपुसमूहान् विजेतुमधरीकर्त्तुंक्षम:स्यात् किंभूतं: साधुभि: शुभग्रहै:पुनरनपापै: पापग्रहै:कृत्वावर्मितोधृतसन्नाह
किंभूतै: साधुभि: निशीथिनीशवदंगात् चंद्रराशियुक्तलग्नात् मारधामगगनोपगतै: सप्तमचतुर्थदशम१०भावोपगतै: किंभूतैरनपापैरिरि६भव११गै: षष्ठैकादशगतै: ५

श्रीगणेशायनमः वृषवाहनविघ्नेशौहंसवाहंसरस्वतीं स्वेष्टंश्रीबटुकंनत्वापितरंत्र्यंकटंततः १ श्रीगौतमकुलो
त्पन्नोज्योतिर्विद्व्यंकटात्मजः हरिकृष्णःकरोत्यत्रशस्त्राध्यायमनुत्तमं २ शस्त्राणांलक्षणंचात्रघटनेचमुहूर्त्तकं
मुहूर्त्तंधारणेचैवफलंमंत्रादिकंतथा ३ तत्रज्योतिर्विदाभरणे विश्वकृत्सुरसवित्र्यजमित्रस्तोमनष्टरदभद्वय
धीरै: संतईज्यमुखचारचतुष्केनव्यवर्मफलकाधृतिमाहु: ४ साधुभिर्निशिथिनीशवदंगान्मारधामगगनोप
गतैर्वा वर्मितोऽरिभवगैरनपापै:स्यात्क्षमोऽहितगणानधजेतुं ५ अथखड्गधारणमुहूर्त्तमाह अंत्यवात्यबृहदै
ज्यशयेन्द्रत्वाष्ट्रभाग्यवसुभान्यगदश्च रिष्टितोमरधृतौधरनेस्या: कव्यसद्युभरितानिवराणि ६

अथखड्गतोमरधारणमुहू
र्त्तमाह अंत्येति अबुधाःरिष्टितोमरधृतौखड्गसर्वलाधारणेऽस्त्र्याकटारिकाया: धारणेच अंत्यादीनिभानिवराणिअगदन् क्षुर्यसिश्रिकोशशयिकाइतिहैमशेषकोश: अं
त्यंरेवती वात्यंस्वाति: बृहत्संज्ञानि ऐज्यंपुष्य: शय:करोहस्त: ऐंद्रंज्येष्ठात्वाष्ट्रंचित्राभाग्यंआर्द्रावसुभंधनिष्ठा एषांद्वंद्वे इमानिकिंभूतानि कव्यसद्युभयुतानि कवि:शुक्र
असतोऽशुभग्रहास्तेषांघस्रोदिना: भानिराशयश्चेषांद्वंद्वे एभिर्युतानि ६

अथबाण धनुर्भिंदिपालादि धारणै: शुद्धिमाह ऐनिति वीरा: ऐनसेत्यादी: अकंथयन् जगदु: कस्मै कंकपत्रा: बाणा धनुश्चाप इत्यादिकानां धृत्यै धारणाय च पुनर्भिंडिपालधारणाय भिंदिपाल: भिण्डिपाल इति शब्दभेद: वरळीदनिभाषा ऐन्द्र रोति अच्युतः इन: सूर्य: भ: अंशुश्च इन्द्र श्व: .... श्रवणह स्ताद्रीज्येष्ठारोहिण्य: निष्कं जलं तस्य भं पूर्वाषाढा धीरसंज्ञानि आचार्यो गुरु: पुष्य: वासव धनिष्ठा भं हारिणि मृदुसंज्ञानि विशाखा आसां वृंदे श्रवणादी: एतास्ता रा: प्रतिनिष्कमिति कंजलं नि: संयोगेऽपि तदेवार्थ: ७ अथ बाणादि धारणे तिथिवारशुद्धिमाह लोहितेति अस्त्रविसर: शस्त्रसमूहो धीयते भद्रैरितिशेष: कै: भद्रैति भद्रास्तिथय: पूर्णा: जयाश्च वतुप्रत्यये भद्रवती भद्रापूर्णवती पूर्णा इत्यर्थ: एताभिर्युक्ता: विधुवाराश्चांद्रदिनास्तै: किंभूतै: भद्रा० लोहितांगो भौम:

अथबाणधनुर्भिंडिपालादिधारणमुहूर्तमाह तत्रैव ऐनशेन्द्रकभनिष्कभधीराचार्यवासवभहारिविशाखा: कंकपत्रधनुरादिकधृत्यै भिण्डिपालधृतयेऽपिचधीरा: ७ लोहितांगहरिहंसदिनाद्यैर्भद्रपूर्णजयवद्विधुवारै: क्षेपणायधनुषेषुगदास्योधीयतेऽस्त्रविसर: सतिलग्ने ८ अथनलिकादिशस्त्रविधानमुहूर्तमाह तत्रैव उग्रदारुणमहाबलभत्यत्वाष्ट्रतिष्यकरकार्ष्णभमिश्रै: आश्रितान्यसदहानिजगुस्तेनैकभेदनलिकास्त्रविधाने ९

हरिर्यम: शनि: हंसो रवि: एषां दिनैराद्यैर्युक्तै: पुन: कस्मिन् सति शुभग्रहे शुभे वा लग्ने सति किंभूतोऽस्त्रविसर: क्षेपेति क्षेपणीयं गोफणिकादि धनु: समासे धनुषमिति इषुर्बाण: गदा अतीता एता आस्यं मुखो यस्य स इत्यादियुक्त इत्यर्थ: धीयते इत्यत्र ऋकारस्य रिज्यदेशत्वाद्दीर्घत्वाभावात् ... मत्रकस्य चिन्मताश्रितं ज्ञात्वेऽन्यथा धीयते इति हुधाञ: प्रयोगो वरमिति ८ अथनलिकादिशस्त्रविधाने भवारशुद्धिमाह उग्रेति ते प्रसिद्धा: धीरा: अनेकभेदनलिकास्त्रविधाने लघुबृहदनेकभेद: बहूषं नलिं जंबूरा इत्यादि बह्निशस्त्रविधाने असदहानि पापग्रहदिवसानि जगु: कथयामासु: किंभूतानि अस० आश्रितानि युक्तानि कै: उग्रेति उग्रसंज्ञानि दारुणसंज्ञानि महाबलो वायुस्तद्भं स्वाति: अंत्यं रेवती त्वाष्ट्रं चित्रा तिष्य: पुष्य: करो हस्त: कृष्णस्येदं कार्ष्ण्यं भं श्रव

णमिश्रसंबेद्धेएषांद्वंद्वेएतैः ९ अथवह्निमुक्तास्त्रेतिथिलग्नशुद्धिमाह स्यादिति वन्हिमुक्तपरमास्त्रविधानं कर्तृपदं अग्निनाप्रेरितलोहगोलकबुइनालिकास्तंफोकवाण
दिकंवाजयायवैरिपराभवायस्यात् किंभूतं वन्हिराजयं जयातिथियुक्तं पुनः किंभूतं सरिक्तं रिक्तायुक्तंकैः कृत्वा अनुदुष्टे पापग्रहे आयगे एकादशभावगे

अथवन्हिमुक्तं मंत्रमुहूर्तमाह स्याज्जयायसजयंचसरिक्तंवन्हिमुक्तपरमास्त्रविधानं चंचरीकहरितावुरिकुंभेरायगैरुपचये
चनुदुष्टैः १० अथायुधपुष्टिकर्म ज्योतिर्निबंधे पूर्णेन्दौसुरवर्गे ५ खर्के १० जीवलग्ने गुरौदिने श्रीमत्सायुधकार्याणिअ
भिषेकोनृपस्यच ११ क्रूरेस्तीक्ष्णेश्चमिश्रैश्चशस्त्रकर्माणिकारयेत् शनिज्यारार्कवारेषु युवयोगे विशेषतः १२ ब्राह्म्यपु
ष्येश्रुतौदास्त्रेमैत्रेभाग्विंदुवासरे नंदापूर्णातिथौमृत्युर्बुधवारेपराजयः १३ स्वातौपौष्णेचशुद्धेद्वेकोशपली विनाशनं चित्रो
तरासुतंहन्यात्मृगककर्यादिभेभयं १४ कृत्तिकाचविशाखाचभौमवारेजयातिथौ तद्दिने घटितंशस्त्रंसंग्रामेजयदाय
कं १५अथशस्त्रधारणं सन्नाहकुंतखड्गादिधारणंसवितुर्वले मिश्रोग्रक्रूरभैः पुंभैजययोगैःस्वरोदितैः १६ अथशस्त्र
न्यासः हस्तत्रयेश्रुतौदास्त्रेपुष्यादित्याग्निभोत्तरे जन्मभेसर्वशस्त्राणामभ्यासः सद्भिरुच्यते १७ ज्ञेज्येभौमार्के
वारेषुतद्धोरातद्विलग्नके सबलैःक्रूरगैरेभि ३।६।७।१० तथोपचयगैः ३।६।११।१० शुभैः १८ धनुश्चक्रंकृ
तेशास्त्रंत्रेतायांखड्गचर्मके द्वापरेचगदाक्षुरीमल्लयुद्धंकलौपरं १९ इषुर्ब्रह्मागुणोविष्णुर्धनुर्देवोमहेश्वरः ए
तेषांस्मरणादेवसर्वपापैः प्रमुच्यते २० शार्ङ्गबाणंदास्तिपंसृणराजोद्भवंधनुः मुष्टिःशुक्रोदरानागावक्र
लग्नप्रपुर्विका २१ भग्नपृष्टंतथावल्कंबलिनोल्लातपूर्वकं आतद्रोघोल्यपर्वाणिवर्जयेद्धन्वमीदृशं २२

उपचयेषु ३।६।१०।११ चंचरीकोवृश्चिकराशिः हरिः सिंहः ताउरिर्वृष कुंभएभिः १० ११ युववेंगोउपग्रहाध्यायेप्राप्तव्यः १२ १३ १४
१५ १६ १७ १८ १९ नरहतिशेषः २० २१ २२

२३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२

गांडीवंधर्नुर्लंङ्गेपंपैणवंस्थात्रिपंचकं पिनाकंदारवंश्रेपं शार्ङ्गंस्याद्धक्कश्टंगजं २३ यस्यांसौपतितौपुन्नवितनंचिसं
चितंमल्लकंपादोस्थानरवौत्रिकं विजमितंमुष्टौशुभौद्धावपि दृष्टिर्लग्नगताप्यरिक्तमुदरंपार्ष्णीक्रिजूसंस्थितौनासासाय
करंविनायदिभवेत्प्राप्तंतदासौष्टवं २४ सुव्रतः सुदृढोदीर्घः सुश्लीष्टिगुमहीरकः स्निग्धःश्लक्ष्णःसुरव श्चगुण
स्याष्टौगुणाःस्मृताः २५ आकर्णपूरयित्वातु सर्वत्राणेनसायकं पार्श्वप्रवर्तिनंकिन्नश्टृणोतिचनपश्यति २६आ
कर्णपूरयेद्बाणंबाणाग्रंचनिरीक्षयेत विद्धंतंपुविजानीयाद्यदिबाहुर्नकंपते २७ यथायोगीश्वरोलक्ष्यंविहान्यायंनपश्य
तितद्वद्धृतराक्षोवाचक्षुभ्र्यांलक्षमानयेत्२८ लक्षियैकमनाभूत्वाविधनेकृतनिश्चयः चेदेवंसायकंमुंचविद्धंलक्षंनसंश
यः २९ दृष्टिमुष्टौशराश्चौचमनोबुद्धिश्चहुंकृतिः स्फूर्जदेतानियुगपल्लक्षवेधस्तदाभवेत् ३० मध्यान्हसमयेचैववह्य
तिसमीरणे संमुखेचैवसूर्यस्यनकुर्याद्बाणमोचनं ३१श्रमंधनुषियेनिस्संनकुर्वंतिधनुर्धराः कुतोलक्षवधस्तेषांसं
ग्रामेषुकुतोजयः ३२ धन्वनागादिइत्यादिप्रदिशोजयेत्समेत्यंतं अयन्तोअग्निरित्यादिशिश्नुंजयतिनिस्सृतो ३३
बाणमंत्रःमुष्टिस्यक्त्वाअपर्वाकोहस्तोनःशेषमष्टहृत अयःस्याद्विषमामध्यंसमेरीजयदोहरीः ३४ अथखड्गलक्षणं
पंचाशदंगुलश्रेष्टंहीनंयत्तंततोधमं अयनोरुत्तरंमध्यंखड्गंप्राहुर्मनीषिणः ३५ अन्हस्वंकंठरिछिन्नंवंशांस्फुटी
तंविश्वनंजगुःनदडश्ननोऽनुकूलंचननिंद्यंशुभमन्यथा ३६ गोजिन्हावंशपत्राज्यकरवीरदलाकृतिं सूच्यग्रसद
शंश्रेष्ठंस्यादितोन्यदशोभनं ३७

३३ ३४ ३५ ३६ ३७

३८ ३९ ४० ४१ ४२ ४३ वेतालस्वरूपमाह ४४ ४५ ४६ आदिशब्देनशस्त्राणांग्रहणं ४७ ४८ अ-
स्त्राणिमंत्रप्रयुक्तानिब्रम्हास्त्रादीनि अग्रेउपासनात्मकेमयावक्ष्यमाणानितेषां ४९ अथसर्वशस्त्राणां घटनेआपत्तानसाधन मूलभूतमंगुल

रंभाद्वेरतक्रयुक्तेयायितेदिनपोषिते सितः सम्यक्कंठितांसनगच्छतिशिलास्वपि ३८ एकादशाकरःकुंतोन
वहरत्तस्तुशावलः सप्तहस्तोभवेत्भल्लुः क्षेपणिपंचहस्तकं ३९ त्रिशूलमष्टहस्तंचशल्यंशूलंचहस्तकं सा
द्विहस्ताद्वयासांगीमुद्गालंबहिर्कंतथा ४० तरुचारीपट्टिशंचदीर्घकंनारसिंहकं कासायलंबालकंचज्ञातव्यं
खड्गवद्बुधैः ४१ अथछुरीकाश्रमविधिः तिथ्यादिके शुभेताराश्चंद्रलग्नबलान्विते कालश्रमक्रियाशस्त्रा
यक्त्वानध्यायवासरं ४२ दैर्घ्येरुद्रयितास्ताविस्तारेननवदंडका सगैरिकतलासृद्धिः श्रमभुमिः प्रशस्य
ते ४३ तत्रसंस्थाप्यवेतालंसुमुहूर्ते [illegible] कटिस्थः छुरीकाहस्तः प्रस्तारीककरंपुनः ४४ किंचिदान
तपूर्वार्द्धयनेचंडांतकाशुकं सरोषा [illegible] हित्वाक्षं धावंतमिवसंस्मरेत् ४५ गुरूपदिष्टमार्गेणवेतालमत
मभ्यसेत् गुरुप्रोक्तोभूगिमतंत्रिशेषैर्निहोररीकृतं ४६ अथदुर्गादिकानांयजनं साधारणेदारुणेभेचचो
ग्रेरिक्तातिथौसूर्यकुजार्कवारे दुर्गादिकानांयजनंप्रशस्तं क्षेत्राधिपस्यापिरुरासवाद्यैः ४७ नृपाप
लोकनंशस्त्रधारणंभूपसंग्रहः शुभदंस्यात्ध्रुवमृदुलघुश्रवणवासवे ४८ अथविशेषः वार्हस्पत्यसं
हितायां अथातः संप्रवक्ष्यामिनृपाणांशस्त्रलक्षणंअस्त्राणामायुधानांचजयार्थंशत्रुवृद्धये ४९ नरस्य
मध्यमंपर्वमध्यमांगुलीसंस्थितंसमंगुलमितिस्यात्तंद्वितयंपर्वमध्यमं ५०

मस्तीनस्प्रमाणमाहनरस्येतित्तस्यमांगुलंतुमध्यमांगुलिमध्यपर्वमितंमध्यमांगुलंतुपार्श्वद्वयपर्वमितंस्यात्: ५०

स्वासि मुष्टु खड्ग ५१ ध्वजादीनां फलमाह ध्वजेत्यादिना वृत्रहन्निति सम्बोधनं ५२ पावके धूमे ५३ शुनि श्वानाये वृषे वृषाये खरे खराये ५४ हे वज्रिन् खगे ध्वांक्षे ५५ शस्त्राणां नक्षत्र ज्ञान माह उक्त इति अ स्मखड्गादि शस्त्रम् उक्त संख्या सम्बान्यंगुलानि तानि सप्तभिर्गुणयेत् ततो सप्तविंशति भक्ते शेषं तुरगादितः अश्विनीनक्षत्रमारभ्य खड्गादीनां नक्षत्रं विज्ञेयं ५६ सर्वतः अथ कूटप्रकारेण नक्षत्रेण सह नृपाणां संयोगं मेलापकं विलोक्य नृपते राज्ञः शुभ शस्त्राणां धारणं शुभं अशुभ शस्त्रं वर्ज्यमिति

मानांगुलमितं शस्त्रमस्त्रं वा स्वासिमेव च तन्मानं त्रिगुणीकृत्य अष्टशिष्टैः क्रमात्फलं ५१ ध्वजे राज्यसमृद्धिः स्याच्छत्रुपिंडविनाशनं आयुर्वृद्धिश्च भूपस्य कोशवृद्धिश्च वृत्रहन् ५२ पावके प्राणनाशः स्याच्छत्रुवृद्धिस्तथैव च राज्ञां दंडो सिकारीयः सर्वशास्त्रेष्वयं विधिः ५३ सिंहे सिंहपराक्रमी बहुधनी दीर्घायुरुग्रो नृणामल्पायुः शुनि मिद्धिनो बहुरिपुः स्याद्दर्थहीनो रणे दीर्घायुर्बहुविक्रमी बहुधनी रुद्धोपमोगो वृषे नाशः शत्रुगणैः समस्तसमरे वित्तादि नश्येत्खरे ५४ गजे मान्यः सर्वैर्नृपतिभिरपि स्याद्रिपुपतिः खगे रोगी नित्यं समरकृतकृत्यो रिपुवशः भवेदेवं सर्वायुधगणमितैर्योज्य नृपतेः फलं वाच्यं वज्रिन् गजतुरगसंख्याभिरपि तत् ५५ उक्तसंख्यासमान्यस्य मुनिभिस्ताडयेत्ततः सप्तविंशतिभिः शिष्टनक्षत्रं तुरगादितः नक्षत्रेणापि संयोगं नृपतीनां तु सर्वतः विलोक्य शुभशस्त्राणां धारणं नृपतेः शुभम् ५७

वराहसंहितायां पंचाशत्तमेध्याये अंगुलशतार्धमुत्तमऊनः स्यात्पंचविंशतिः खड्गः अंगुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्वस्थः ५८ श्रीवृक्षवर्धमानातपत्रशिवलिंगकुण्डलाब्जानां सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानां च ५९

त्यर्थः ५७ अथ खड्ग लक्षणमाह अंगुलमिति खड्ग (तलवार) (पन्नास पासून पंचवीस अंगुले पर्यन्त लांब असावी.) पन्नास अंगुले लांब उत्तम, पंचवीस अंगुले कनिष्ठ होय. खड्गावर व्रण (खबगे इ०) अंगुलमानाने विषम (१।३।५ इ०) अंगुलावर असेल तर तो अनिष्ट जाणावा. ५८ बिल्ववृक्ष, वर्धमान (शराव, परीब), छत्र, शिवलिंग, कुण्डल, कमल, ध्वज, खड्गादि आयुध, स्वस्तिक यांसारिखे व्रण (खबगे) शुभ होत ५९

सरडा, काक, कंक, मांसभक्षक गृध्रादिक, छिन्नमस्तक पुरुष, विंचू यांच्या आकारासारिखे व खड्गाच्या मध्यभागीं व बहुत व्रण (खांचा, खळगे) शुभ नव्हत. ६० स्फुरित (फुटलेला), प्रमाणहीन, अतीक्ष्ण, मध्यभागीं तुटल्यासारिखा, चक्षु व मन यांस प्रिय नव्हे, मारला असतां शब्द होत नाहीं असा खड्ग अशुभ होय. याहून अन्यप्रकारचा खड्ग शुभ होय ६१ खड्गाचा स्वतः च शब्द होईल तर खड्ग स्वामीस मरण होते. कशि (मेण) यापासून खड्ग निघणार नाहीं तर पराजय होतो. खड्ग स्वतः च कोशांतून निघेल तर युद्ध होतें. खड्ग ज्वलित होइल तर विजय होतो ६२ खड्ग (पान) कारणावांचून मेणांतून काढूं

कृकलासकाककंक क्रव्यादकबंधवृश्चिकाकृतयः खड्गे व्रणानशुभदावंशानुगताःप्रभूताश्च ६० स्फुटितो ह्रस्वः कुठोवंशछिन्नोनदृङ्मनोनुगतः अस्वनइतिचानिष्टःप्रोक्तविपर्यस्तइष्टफलः ६१ क्वणितंमरणायोक्तंपराजयायप्रवर्त्तनंकोशात् स्वयमुद्गीर्णेयुद्धंज्वलितेविजयोभवतिखड्गे ६२ नाकारणंविवृणुयान्नविघट्टयेच्चपश्येन्नतत्रवदनंनवदेच्चमूल्यं देशंनचास्यकथयेत्प्रतिमानयेच्चनैवस्पृशेन्नृपतिरप्रयतोसियष्टिं ६३ गोजिह्वासंस्थानोनीलोत्पलवंशपत्रसदृशाश्च करवीरपत्रशूलाग्रमंडलाग्राः प्रशस्ताःस्युः ६४ निष्पन्नोनच्छेद्योनिकषैःकार्यःप्रमाणयुक्तःसः मूलेम्रियतेस्वामीजननीतस्याग्रतश्छिन्ने ६५ यस्मिन्सरुप्रदेशे व्रणोभवेत्तद्वदेवखड्गस्य वनितानामिवतिलकोगुह्येवान्योमुखेदृष्टा ६६

नये व चाळवूं नये. पानामध्ये मुख पाहूं नये. कारणावांचून खड्गाची किंमत बोलूं नये. खड्गाची जाति सांगूं नये. खड्ग अंगुलांनीं मोजूं नये. राजानें अपवित्र असतां, पानास स्पर्श करूं नये. ६३ गाईच्या जिभेसारिखा, नीलकमल, बांबूचें पान, कण्हेरीचें पान, शूलाचें अग्र यां सारिखें मण्डलाग्र (खड्ग) शुभ होत ६४ तयार झालेला खड्ग प्रमाणाधिक होईल तर, तोडूं नये. घांसून प्रमाण युक्त करावा त्याचे मूळ तोडिलें तर स्वामीस मृत्यु. अग्र तोडिलें तर त्या स्वामीचे आईस मृत्यु होतो. ६५ ज्या खड्गमुष्टिप्रदेशीं व्रण असेल त्याच खड्गप्रदेशीं व्रण आहे असें सांगावें ६६ मुष्टिमूलीं व्रण असेल तर खड्गमूलीं व्रण आहे. मध्यभागीं

असेल तर खड्गमध्यभागीं.अग्रभागीं अं० तर खड्गाग्रीं व्रण आहे असें सांगावें जसें स्त्रीच्या मुखावर तिलक पाहून गुह्यावर आहे, असें समजलें तसें च हें समजावें ६६ अथवा शस्त्रधारण करून विचारणारा ज्या अंगास स्पर्श करील तें पाहून, व हें वक्ष्यमाण खड्गशास्त्र जाणून, तसा मेणांतील खड्गास व्रण आहे असें सांगावें ६७ पृच्छक मस्तकावर स्पर्श करील तर खड्गास पहिल्या अंगुलीं व्रण आहे असें सांगावें. कपाळास स्पर्श करील तर दुसऱ्या अं०, भ्रूमध्यास स्पर्श० तर तिसऱ्या अं०, नेत्रांस स्पर्श करील तर चवथ्या अंगुलीं व्रण आहे असें सांगावें ६८ पृच्छक नासिका, ओष्ठ गाल, हनवटी, कान, कंठ, अंस यांस स्पर्श करील तर अनुक्रमें खड्गाच्या

अथवास्पृशतियदंगं प्रष्टानिस्त्रिंशभृत्तदवधार्य कोशस्थस्यादेश्योव्रणोसिशास्त्रंविदित्वेदं ६७ शिरसिस्पृष्टेप्रथमेंगुलेद्वि
तीयेललाटसंस्पर्शे भ्रूमध्येचतृतीयेनेत्रेस्पृष्टेचतुर्थेच ६८ नासोष्ठकपोलहनुश्रवणग्रीवांसकेषुपंचाद्याः उरसिद्वादश
संस्थस्त्रयोदशोकक्षयोर्ज्ञेयः ६९ स्तनहृदयोदरकुक्षीनाभीषुचतुर्दशादयाज्ञेयाः नाभीमूलेकट्यांगुह्येचैकोनविंशतितः
७० ऊर्वोर्द्वाविंशेस्यादूर्वोर्मध्येव्रणस्त्रयोविंशे जानुनिचचतुर्विंशाजंघायांपंचविंशेच ७१ जंघामध्येगुल्फेपार्ष्ण्यांपादेतदंगु
लीष्वपिच षड्विंशतिकाद्यावत्त्रिंशदितिमतेनगर्गस्य ७२ पुत्रमरणंधनाप्तिर्धनहानिःसम्पदश्चबंधश्च एकाद्यंगुलसंस्थे
व्रणेःफलंनिर्दिशेत्क्रमशः ७३ सुतलाभःकलहोहस्तिलब्धयःपुत्रमरणधनलाभौ क्रमशोविनाशवनिताप्तिचित्तदुःखानि
षट्प्रभृति ७४

पांच, सहा, सात, आठ, नऊ, दहा, अकरा या अंगुलावर व्रण आहे, उरांस स्पर्श करील तर बारा अंगुलांस, कांखेस स्पर्श० तर तेरा अंगुलांवर व्रण आहे असें सांगावें ६९ पृच्छक स्तन, हृदय, उदर, कुक्षी, नाभि यांस स्पर्श करील तर अनुक्रमें १४।१५।१६।१७।१८ या अंगुलीं, नाभिमूळ, कटी, गुह्य यां सस्पर्श करील तर १९।२०।२१ या अंगुलीं ७० मांड्यांस स्पर्श क० तर २२ अंगुलीं, मांड्यांच्या मध्यें स्पर्श० तर २३ अंगुलीं. जानूंस स्पर्श० २४ अंगुलीं, पोटऱ्यांस स्पर्श क० २५ या अंगुलीं ७१ पोटऱ्यांच्या मध्यें, गुल्फ, खोट, पाय व त्यांच्या अंगुली यांस स्पर्श करील तर अनुक्रमानें २६।२७।२८।२९।३० या अंगुलांवर खड्गास व्रण आहे असें समजावें असें गर्गऋषीचें मत आहे ७२ एकादि अंगुलां खड्गास जे व्रण त्यांचीं हीं वक्ष्यमाण फळें अनुक्रमानें जाणावीं. १ अंगुलीं पुत्रमरण, २ धनप्राप्ति, ३ धननाश, सं

पत्ति, वंध हीं फलें होत. ७धनसुतलाभ, ७कलह, ८गजलाभ, ९पुत्रमरण, १०धनलाभ, ११विनाश, १२स्त्रीप्राप्ति. १३ चित्तास दुःख, हीं सहा अंगुलापासून अनुक्रमें फलें होत ७४. १४लाभहानि, १६स्त्रीलाभ, १७वध, १८वृद्धि, १९मरण, २०संतोष हीं फलें चवदां पासून जाणावीं. २१धनहानि होतसे ७५ २२ धनप्राप्ति, २३मृत्यु, २४धनप्राप्ति, २५मृत्यु २६सम्पत्ति, २७निर्धनत्व, २८ऐश्वर्य, २९मृत्यु, ३०राज्य हीं फलें तीस पर्यंत जाणावीं.७६ तीस अंगुळांपुढें अग्रपर्यंत विशेष फळ नाहीं. विषम अंगुळीं अशुभफळ व सम अंगुळीं शुभफळ जाणावें. कोणी आचार्य तीस अंगुळांपुढें अग्रपर्यंत फळच नाहीं असें म्हणतात.७७ कण्हेर पुष्प, कमळ, हत्तीचा मद, घृत, कुंकुम, कुंदपुष्प, चम्पकपुष्प, यां सारिखा खड्गाचा गंध शुभ होय. गोमूत्र, चिखल, मेंदु यां सारिखा खड्गाचा गंध अशुभ होय ७८ कांसव, वसा (चरबी)

लब्धिर्हानिः स्त्रीलब्धयो वधो वृद्धिमरणपरितोषाः ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात् ७५ वित्ताप्तिर्निर्वाणं धनागमो मृत्युसम्पदोऽस्वत्वं ऐश्वर्यमृत्युराज्यानि चक्रमात्त्रिंशदिति यावत् ७६ परतो न विशेषफलं विषमसमस्थास्तु पापशुभफलदाः केचिदफलाः प्रदिष्टास्त्रिंशत्परतोऽग्रमिति यावत् ७७ करवीरोत्पलगजमदघृतकुंकुमकुंदचम्पकसगंधः शुभदो निष्टो गोमूत्रपंकमेदःसदृशगंधः ७८ कूर्मवसासृक्क्षारोपमश्च भयदुःखदो भवति गंधः वैडूर्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः ७९ इदमौशनसंच शस्त्रपानं रुधिरेण श्रियमिच्छतः प्रदीप्तां हविषा गुणवत्सुतामिलिप्सोः सलिलेनाक्षयमिच्छतश्च वित्तं ८० वडवोष्ट्रकरेणुदुग्धपानं यदि पापेन समीहतेऽर्थसिद्धिं झषपित्तमृगाश्ववस्तदुग्धैः करिहस्ताच्छिदये सतालगर्भैः ८१

रक्त, क्षार या सारिखा गंधाचा खड्ग भय व दुःख देतो. वैडूर्यमणि. सुवर्ण, वीज यांसारिखा तेजस्वी खड्ग जय, आरोग्य व वृद्धि करतो ७९ हें वक्ष्यमाण शस्त्रपान (शस्त्रास पाणी देणें) शुक्रानें सांगितलें. उज्ज्वल लक्ष्मी इच्छिणाऱ्याच्या खड्गास रक्तानें पाणी द्यावें गुणवान्पुत्र इच्छूच्या खड्गास घृतानें पाणी द्यावें. अक्षय द्रव्येच्छूच्या खड्गास उदकानें पाणी द्यावें ८० जर पापानें (वधादिकानें) अर्थसिद्धि इच्छील तर घोडी, उंटीण, हस्तीण यांच्या दुधानें पाणी द्यावें. हत्तीची शुण्डा तोडण्याते इच्छिणाऱ्याच्या खड्गास मत्स्यपित्त मृगी, घोडी शेळी यांचें दुध व तालगर्भ (ताडी) हीं एकत्र करून पाणी द्यावें ८१

रुवीचे दुधं (चीक) मेंढ्याच्या शिंगाची राख करून तिणें युक्त करावे व पारवा, उंदीर यांच्या विष्ठेनें युक्त करून त्याचा लेप तैल मर्दित शस्त्रास करावा नंतर पाणी द्यावें नंतर घासून तीक्ष्ण करावा म्हणजे तो खड्ग दगडावर मारिला तरी मोडत नाहीं. ८२ केळीचा क्षार (राख) ताकानें युक्त करून अहोरात्र ठेवू

आर्कपयोहुडुविषाणमषीसमेतंपारावतासुशकृतान्वयुतंप्रलेपः शस्त्रस्यतैलमथितस्यततोस्यपानंपश्चाच्छितस्य नशिताःसुभवेद्दिघातः ८२ क्षारेकदल्यामथितेनयुक्तेदिनोषितेपायितमायसंयत् सम्यक्छितंचाश्मनिनैतिभंगंन चान्यलोहेष्वपितस्यकौंठ्यं ८३ अथशस्त्रलक्षणं अग्निपुराणे चामरोरुक्मदंडोग्र्यश्छत्रंराज्ञःप्रशस्यते हंसपंक्ति विरचितंमयूरस्यशुकस्यच ८४ पक्षैर्वाथबकाकायानकार्यैर्मिश्रपक्षकैः चतुरस्रंब्राह्मणस्यवृत्तंराज्ञश्चशुल्ककं ८५ त्रिचतुःपंचषट्सप्तअष्टपर्वश्चदण्डकः भद्रासनंक्षीरवृक्षैःपंचाशदंगुलोच्छ्रयैः ८६ विस्तारेणत्रिहस्तंस्यात्सुवर्णा द्यैश्चचित्रितं धनुर्द्रव्यत्रयंलोहंशृंगंदारुद्विजोत्तम ८७ ज्याद्रव्यत्रितयंचैववंशभंगात्त्वचस्तथा दारुचापप्रमाणंतुश्रे ष्ठंहस्तचतुष्टयं ८८ तदेवसममानंतुप्रोक्तंमध्यकनीयसि सुष्टिग्राह्यनिमित्तानिमध्येद्रव्याणिकारयेत् ८९ स्वल्पाको टिस्त्वचाशृंगःशार्ङ्गलोहमयीद्विज कामिनीभ्रूलताकाराकोटिःकार्यासुसंयता ९० पृथग्वाविप्रमिश्रंवालौहंशार्ङ्गंतुका रयेत् शार्ङ्गंस्नायुचित्तंकार्यंरुक्मबिंदुविभूषितं ९१ कुटिलंस्फुटितंचापंसच्छिद्रंचनशस्यते सुवर्णंरजतंताम्रंकृष्णायो जंधनुःस्मृतं ९२ माहिषंशारभंशार्ङ्गंन्यग्रोधस्यधनुःस्मृतं चंदनंवेतसंशालंधावनंककुभंतरुः ९३ सर्वश्रेष्ठंधनुर्व शैर्गृहीतैःशरदिस्मृतैः पूजयेत्तुधनुःखड्गंमंत्रैस्त्रैलोक्यमोहनैः ९४ अयसश्चाथवंशस्यशरस्याथशरास्त्वतं ऋजवो हेमवर्णाभाःस्नायुश्लिष्टाःसुपत्रकाः ९५

न तें पाणी ज्या लोखंडास दिले व उत्तम पाजवलें ते दगडावरही नाश पावत नाहीं व अन्य लोखंडावरही ते कुंठित होत नाहिं ८३ ८४ ८५ ८६ ८७ ८८ ८९ ९० ९१ ९२ ९३ ९४ ९५ २ २

रुक्मपुंखाः स्त्रिपुंखास्तु नैलधूना: सुवर्णका: यात्रायामभिषेकादौ यजेद्बाणधनुर्भुखान् ९६ सपताकास्त्रसंग्राहः सांवत्सरि
कान्नृपा: ब्रह्मा वै मेरुशिखरे खड्गं गंगातटे यजेत् ९७ लोहदैत्यं सदभ्रशो विघ्नं यज्ञेतु विचिंतयेत् तस्य चिंतयतो वह्नेः पुरःधोत्
ह्वलीमहान् ९८ ववंदे उजं चतं दृष्ट्वा अभ्यनंदंस्तु हर्षिताः तस्मात्तु नंदकः खड्गो देवोक्तो हरिरग्रहीत् ९९ तं जग्राह गले देवो विकोशः
सोऽप्यपद्यत खड्गो नीलो रत्नपुष्टिस्ततोऽभूत्शतबाहुकः १०० दैत्यः सगदया देवान्द्रावयामास वैरणे विष्णुना खड्गछिन्नानि दै
त्यगात्राणि भूतले १०१ पतितानि तु संस्पर्शान्नंदकस्य च तानि ह लोहभूतानि सर्वाणि हत्वा तस्मै हरिर्वरं १०२ ददौ पवित्रमङ्गं ते
आयुधाय भवेद्भुवि हरिप्रसादाद्ब्रह्मापि विना विघ्नं हरिं प्रभुं १०३ पूजयामास यत्नेन वक्ष्येथो खड्गलक्षणं खड्गी खड्गरजाताये
दर्शनीयास्तु ते स्मृताः १०४ कायच्छिद्रास्त्वार्बिकाः स्युर्दृढाः सूर्पारकोद्भवाः तीक्ष्णास्तेद शहावंङ्ग स्तीक्ष्णाः स्याच्चांग्र देशजाः
१०५ शतार्द्धमंगुलानां तु श्रेष्ठं खड्गं प्रकीर्त्तितं तदर्धं मध्यमं प्रोक्तं ततो हीनं न धारयेत् १०६ दीर्घस्वनमधुरशब्दं यस्य खड्गस्य सत्तम
किंकिणीसदृशं तस्य धारणं श्रेष्ठमुच्यते १०७ खड्गः पद्मपशाखाग्रो मंडलाग्रश्च शस्यते करवीरदलाग्रालो घृतगंधो विपत्प्रभुः
१०८ समांगलस्याः सस्यंते ब्रह्मा खड्गेषु लिंगवत् काकोलूकसवर्णाभा विषमास्तेन शोभनाः १०९ खड्गेन पश्येद्वदनं नोच्छिष्
श्च्यस्पृशेदसिं मूल्यं जातिं न कथयेन्निशि कुर्यान्नशीर्षके ११० पुराण गर्गसंहितायां इत्युक्त्वा कवचं दिव्यं धनमर्बुद निर्मितं शि
रस्त्राणं सिधुजं च सद धार महोद्भटः १११ सौवीरस्य धनुः शालिलला टं चेषुधिद्वयं आदाय म्लेंछदेशस्य खड्गं चर्म च कौरजं १
१२ पेठरस्य महाशक्तिं गुर्जराटभवां गदां परिघं वंगजं धृत्वा हस्तत्राणं च कौंकणं ११३ बद्धगोधांगुली त्राणः किरीटी रत्नकुण्ड-
लः रुक्मांगदस्तद्रुक्मीयुद्धं कर्तुं मनोदधे ११४ अथ शास्त्रमंत्राः आश्विनस्यासिते पक्षे नवम्यां पूजयेन्नृपः तेषां नामानि मं
त्राणि प्रवक्ष्यामि विशेषतः ११५ अथ ध्वजमंत्रः शक्रकेतो महावीर्य श्यामवर्णार्चयाम्यहं पविराजनमस्तेस्तु तथा नारायणध्व
ज ११६ अथ पताकामंत्रः कालनेमियुधे यद्वद्युद्धे देवासुरे तथा दहस्वाशु रिपून्सर्वान्पताके त्वं मयार्चिता ११७ अथ खड्ग

मंत्रः असिर्विषसनः खड्गस्तीक्ष्णधारोदुरासदः श्रीगर्भो विजयश्चैव धर्मीधारस्तथैवच ११८ इत्यष्टौ तवनामानि स्वयमुक्ता
निवेधसा पितापितामहो देवस्त्वन्मां पालयसर्वदा ११९ अथचापमंत्रः सर्वायुधमहामात्र सर्वदेवारिसूदन चापमांसर्वदारक्ष
साकंसायकसत्तमैः १२० अथछुरिकामंत्रः सर्वायुधानांप्रथमंनिर्मितासिपिनाकिना शूलायुधाद्विनिष्क्रम्यकृत्वामुष्टिग्रहं
शुभं १२१ सर्वसत्वांगभूतासिसर्वाशुभनिवारिणी छुरिकेरक्षमांनित्यंशांतिंयच्छनमोस्तुते १२२ अथकटारिमंत्रः रक्षांगानि
गजान्रक्षरक्षवाजिधनानिच ममदेहंसमारक्षकटारिकेनमोस्तुते १२३ अथकुंतमंत्रः प्रासपालयशत्रूंस्त्वमनयादेवमा-
यया गृहाणजीवितंतेषांममसैन्यंचरक्षय १२४ अथचर्ममंत्रः शर्मप्रदस्त्वंसमरेचर्मसैन्येयशोद्यमे रक्षमांरक्षणीयोहंताप
नेयनमोस्तुते १२५ अथकवचमंत्रः शरणंलोकरक्षार्थंविबोदात्कवचंशुभं तस्मात्त्वंमेसदारक्षरणेकवचतेनमः १२६
अथशक्तिमंत्रः देव्यात्वंनिर्मितापूर्वंशक्तेशुंभासुरापहे त्वंमांत्राहिरणेनित्यंशक्तेतेमेनमोनमः १२७ अथकनकदंडमं
त्रः प्रोत्सारणायदुष्टानांसाधूनांरक्षणायच ताडयस्वरिपून्सर्वान्हेमदंडनमोस्तुते १२८ अथकुंतादिचक्रं कुंताकारंलि-
खेच्चक्रंतीक्ष्णंदंडंसशांबिकं दिनभानिसमारभ्यकर्त्तव्यंनवकंत्रयं १२९ राजभंनवकेयत्रतत्रवक्ष्येशुभाशुभं तीक्ष्णेमृत्यु
र्जयोदण्डेसंधिर्धिष्ण्येसमंरणे १३० त्रिशूलमध्यपृष्ठकरंशल्यंशूलंत्रिहस्तकं सार्द्धहस्तद्वयाशृंगीमुद्गलंहस्तकंतथा १३१
एकादशाकरःकुंतोनवहस्तस्तुशर्बलः सप्तहस्तोभवेद्धक्षः प्रेक्षणीपंचहस्तिका १३२ प्रभुभंयत्रनवकेक्रूरैःपूर्वोक्तव
त्फलं दण्डायुधेषुसर्वेषुकुंतवच्चिंतयेद्बुधः १३३ अथखड्गादिचक्रं खड्गचक्रंलिखेच्चादौनवभेदसमन्वितं योधधिष्ण्य
समारभ्यत्रीणित्रीणिलिखेद्बुधः १३४ पद्ररेखायावधिर्दैन्यंतत्तुक्रूरैर्भवेन्मृतिः मिश्रैर्मिश्रंशुभैःसौम्यंनिर्वेधेशुभमादिशे
त् १३५ यवंवज्रंतथामुष्टिपालिकाबंधधारयोः खड्गंतीक्ष्णंविजानीयान्नवांगानिविभागतः १३६ यवादौयत्रबंधोवाजा
यतेक्रूरखेचराः मृत्युर्भंगोभयंयुद्धेसौम्येलाभोजयस्तथा १३७ खड्गधारद्वयेतीक्ष्णेक्रूरैर्जयतिसंगरे सौम्यैस्तत्रभवे-

डुंगोमिश्रैर्मिश्रफलंततः १३८ तरुवारीपट्टिशंचदीर्घकंनरसिंहकं कात्यालपंबाणकंचज्ञातव्यंखड्गवह्बुधैः १३९ अथख
ड्गचक्रं सूर्यभाद्दिनभंयावद्गणनीयंयथाक्रमं दीयतेसप्तऋक्षाणिमूलमध्ययपल्लभे १४० मूलेलाभोजयोमध्येअग्रेचक
लहप्रदः पल्लवेप्राणसंदेहोखड्गचक्रेफलंक्रमात् १४१ अथसशरचापचक्रं चापंसमालिखेच्चक्रंगुणबाणसमन्वितं शशि
नक्षत्रतोभानित्रीणित्रीणिसमालिखेत् १४२ त्रीणिबाणसमूलेषुमध्येमूर्ध्निक्रमात्तथा चापस्यमूलमध्येधैत्रीणित्रीणित
थापुनः १४३ गुणेतुत्रीणित्रीण्येवयोधनुःक्षत्रलः फलं शरमूलेभवेन्मृत्युर्मध्येव्याधिःफलेजयः १४४ गुणमध्येभवेद्भंग
श्चापमध्येधनक्षयः चापोर्द्धविजयोज्ञेयोगुणेधैर्लाभसंयुतः १४५ चापाधोविग्रहोमृत्युर्गुणाधश्च्यतथाफलं पापग्रहयु
तेनष्टंविशेषेणतुनान्यथा १४६ सौम्यक्षीतीजयोलाभोचापचक्रेसमादिशेत् शुभपापसमायोगेबलाधिकबलंस्फुटं १४
७ भूपाले गांडिवंवर्तुलंज्ञेयंवर्तुलंस्यात्त्रियंबकं विनायकंदारवंभोक्तंशार्ङ्गंस्याद्दक्षशृंगकं १४८ अथसशरधनु
श्चक्रं सूर्यभाज्जन्मभांतचधनुष्यंचयोजयेत् चापाग्रेबाणसंख्यांकंशराग्रेपंचयोजयेत् १४९ शरमूलेतथापंच पंचसंधौप्रकीर्ति
तं दण्डेचसप्तकंदद्याद्धनुष्कक्रमुत्तमं १५० अग्रेहानिःशरेलाभोशरमूलेजयस्तथा चापसंधौतुवीर्यंस्याद्दण्डेभंगःप्रजायते १५१
अथछुरिकादिचक्रं ज्येष्ठांसलात्प्रभृतिमाशनिभाच्छुरिकाततः बालीकुमारीचामुंडाकालिकामक्षिकातथा १५२ भैरवीयोगि
नीचैवत्रिपुराशांनिकारिका पंचदशादंगुलात्तुज्ञातव्याप्रथमादितः १५३ चण्डापविन्निकावेणाअंगुलेद्वेप्रकीर्त्तिता पंचांगुली
वाकुंडीस्यात्षड्न्यूनायभद्रंष्ट्रिका १५४ एकविंशोद्भूतोज्ञेयंलगंकापश्चगुप्तिका खड्गवच्छुरिकाज्ञेयायोधधिष्ण्यादिसोन्यः
सेत् १५५ छुरिकाचेन्यसेच्चक्रेसूर्यभात्सप्तविंशतिः एकमग्रेहिबलना भूतिरस्तोनिर्वांतरे १५६ पापग्रहोथवाचन्द्रःपापयुक्
त्कोथवाबुधः यत्रतेतत्रघातःस्याद्रूहस्तुक्लोलप्रभुः १५७ अथलोहयष्ट्यादिचक्रम् पंचाशदंगुलाद्दण्डेदलेप्यर्धांगुला
ग्रास्त्रलांनिषोडशैवस्युःकुलिशोगुलमात्रकः १५८ श्रवणंकलुशेज्ञेयंतदर्धपलकेत्रयं पत्रेषुषोडशास्राणिपत्रोर्ध्वबलयेत्र

य: १५९ द्वेदण्डेमुष्टिदेशोद्वेचिंतयेत्सापखेचरान् नृपघ्नाः कलशेमुष्टौदण्डेराष्ट्रंदलेरिपुं १६० वलयेसैनिकान्हन्युर्गदायांमुद्गरेपिच
पत्राण्यष्टाष्टांगुलानिरौद्रात्कलशतोन्यसेत् १६१ षष्ट्यंगुलालोहयष्टिर्द्विकुंभापश्चकिंकिणी जनर्क्षपूर्वकलशोवलयेपंचपञ्चच १६२
एकमृक्षमधःकुंभेपापःकलशयोर्नृपं हन्युर्वलयगाःशत्रुंशुभाः सर्वत्रसौख्यदाः १६३ अथवज्रचक्रं वज्रेंगुलंतुकलशःषड्गुली
चतुरंगुला दलोर्द्धाधस्त्रिकोणेद्वे मुद्रेदण्डोद्विहस्तकः १६४ ज्येष्ठाद्यमेकलशेमुष्टौमुद्रेषांत्रीण्यधोदले धृतिस्त्रीणित्रिकोणेस्युर्द्वौ
दण्डेमुष्टगपरम् १६५ स्वामिनंकलशेमुष्टौमुद्रयोःपत्तिकुंजरान् दण्डेराष्ट्रंरिपुंपत्रेहन्युःपापाःपविस्थिताः १६६ अथांकुशच
क्रं षडंगुलोधःपरिधौदंतोवक्रःषडंगुलः दण्डोंगुलानिपंचाशदायुक्तकुशसंज्ञके १६७ वन्हिभात्त्रीणिदन्ताग्रेदन्तमध्येभ
पंचकं सप्तमूलेग्रहादण्डेमुष्टौत्रीण्यंकुशायुधे १६८ दन्ताग्रमध्ययोःशत्रुंदन्तमूलेगजव्रजान् दण्डेराष्ट्रंप्रभुंमुष्टौपापाघ्नंत्यंकु
शस्थिताः १६९ अथपरश्वधकुठारचक्रम् हलेदण्डोद्यष्टहस्तरुज्जुदण्डषडंगुलम् मध्येत्र्यस्त्रंचपरशुस्ततास्त्रिर्द्वादशांगुलः
१७० मूलाद्द्वादशधारायांमध्येषष्ट्यांशकेव्ययः दण्डेत्रीणिद्वयंमुष्टौधिष्ण्यनाशःपरस्वधे १७१ पापाधाराःस्थिताःशत्रुंहन्युर्मु
ष्टिस्थिताःप्रभुं सप्तषडंगुलाधाराकुठारेपूर्ववत्फलं १७२ अथवज्रमुष्टिचक्रं षट्त्रिंशदंगुलोदण्डोऽर्कांगुलंशृंखलात्रयम् १
७३ तदग्रेतिन्दुकाकारंषडस्त्रंगोलकत्रयं गोलत्रयेधृतिःसर्पाःशृंखलासुत्रयंक्रमात् १७४ शृंखलामूलकेत्रीणिदण्डेद्वेमुष्टि-
गंद्वयं गोलेपापाःस्वामिनंहन्युरायुधेवज्रमुष्टिके १७५ पत्रनिंद्यफलाःपापास्तत्रसौम्यफलप्रदाः अथशक्तिचक्रं शक्तिस्त्रि
शूलद्वितयमधोर्द्धद्वादशांगुलं १७६ तानित्र्यस्त्राणिशूलानिद्व्यंगुलामुद्रिकाध्यधः दण्डोजिनांगुलःशक्तिरेवंपंचदशांगुला १७
७ याम्यादित्रितयंमुष्टौमुद्रिकायांमृगात्त्रयं पुष्पात्त्रयंमध्यशूलेभाग्याच्छद्पार्श्वशूलयोः १७८ धनिष्ठादित्रयंमध्येत्रीण्यहिर्बु
ध्न्यतस्तले मध्यशूलेजन्मधिष्ण्यंतत्रचेद्दिनभंमृतिः १७९ शेषशास्त्राणिकार्याणियथाशोभंयथारुचि नतत्रधिष्ण्यन्यासोस्ति-
नैवचिंत्यंशुभाशुभं १८० शस्त्रनिर्वापणंक्रूरैस्तीक्ष्णैर्मिश्रैस्तुकारयेत् शनीज्यारार्कवारेषु ध्रुवयोगेविशेषतः १८१ नृपावलोक

नंशस्त्रधारणंभृत्यसंग्रहः शुभदःस्यात्क्वमृदुलघुश्रवणवासवैः १८२ शुक्रनीतिशास्त्रे तदापिब्राह्मणायुद्धे नाशयेयुस्तुतान्ध्रुवं उत्त
मंमांत्रिकास्त्रेण नालिकास्त्रेणमध्यमं १८३ शस्त्रैः कनिष्ठंयुद्धंतुबाहुयुद्धंततोऽधमं मंत्रेरितमहाशक्तिबाणाद्यैःशत्रुनाशनं १८४ मां
त्रिकास्त्रेणतद्युद्धं सर्वयुद्धोत्तमंस्मृतं नालाग्निचूर्णसंयोगाल्लक्षे गोलनिपातनं १८५ नालिकास्त्रेणतद्युद्धं महाह्रासकरंरिपोः कुं
तादिशस्त्रसंघातैर्नाशनंरिपूणांचयत् १८६ शस्त्रयुद्धंतुतज्ज्ञेयंनालास्त्राभावतःसदा कर्षणैः संधिमर्मणांप्रतिलोमानुलो-
मतः १८७ बंधनैर्घातनंशस्त्रोर्युक्त्यात्तद्बाहुयुद्धकं नालास्त्राणि पुरस्कृत्य लघूनिन्वमहंतिच १८८ अस्त्रंतदन्यतःशस्त्रमासि
कुंतादिकंचयत् अस्त्रंतुद्विविधंज्ञेयंनालिकंमांत्रिकंतथा १८९ यदातुमांत्रिकंनास्तिनालिकंतत्रधारयेत् सहंशस्त्रेणनृपतिर्वि
जयार्थंतुसर्वदा १९० लघुदीर्घाकारधाराभेदैःशस्त्रास्त्रनामकं प्रथयंतिनवंभिन्नंव्यवहारायतद्विदः १९१ नालिकंद्विविधं
ज्ञेयंबृहत्क्षुद्रविभेदतः तिर्यगूर्ध्वछिद्रमूलंनालंपंचवितस्तिकं १९२ मूलाग्रयोर्लक्ष्यभेदीतिलबिंदुयुतंसदा यंत्राघाताग्नि
कृद्ग्रावचूर्णमूलककर्णकं १९३ सुकाष्ठोपांगबुध्नंचमध्यांगुलबिलांतरं स्वांतेग्निचूर्णसंधात्रीशलाकासंयुतंदृढं १९४ लघु-
नालिकमप्येतत्प्रधार्यंपत्तिसादिभिः यथायथातुत्वक्सारंयथास्थूलबिलांतरं १९५ यथादीर्घंबृहद्गोलंदूरभेदीतथातथा
मूलकीलभ्रमाल्लक्ष्यसमसंधानभाजियत् १९६ बृहन्नालिकसंज्ञंतत्काष्ठबुध्नविवर्जितं प्रवाह्यंशकटाद्यैस्तुसुयुक्तंविज-
यप्रदं १९७ सुवर्चिलवणात्पंचपलानिगंधकात्पलं अंतर्धूमविपक्वार्कस्नुह्याद्यंगारतःफलं १९८ शुद्धात्संग्राह्यसंचूर्ण्यसं
मील्यप्रपुटेद्रसैः शुद्धार्कार्णारसोनस्य शोषयेदातपेनच १९९ पिष्ट्वाशर्करवच्चैतदग्निचूर्णंभवेत्खलु सुवर्चिलवणाद्भागाः
षड्वाचत्वारएववा २०० नालास्त्रार्थाग्निचूर्णेतुगंधांगारौतुपूर्ववत् गोलोलोहमयोगर्भगुटिकःकेवलोपिवा २०१ सीसस्य
लघुनालार्थेह्यन्यधातुभवोपिवा लोहसारमयंवापिनालास्त्रंत्वन्यधातुजं २०२ नित्यसंमार्जनंस्वच्छमस्त्रपातिभिरावृ
तं अंगारस्यैवगंधस्यसुवर्चिलवणस्यच २०३ सिलायाहरितालस्यतथासीसमलस्यच हिंगुलस्यतथाकांतरजतःक
पूरस्यच२०४

२०५ २०६ २०७ २०८ २०९ २१० २११ २१२ २१३ २१४ २१५ २१६ सारं पुरोगामी मध्यमं फल्गुवाश्चांत्यं २१७ सानुकर्षा इत्यादीनि विचाती
कानां विचित्राणां सैन्यानां विशेषणानि चित्राश्चतेअनीकाश्चेति समासः अनीको स्त्री रणे सैन्ये इति मेदिनी अनुकर्षः युद्धविमर्दोयस्य कस्यचिद्रथावयवस्य

जंतोर्निल्याश्चसरलनिर्यासस्यतथैवच समन्यूनाधिकैरंशैरग्निचूर्णान्यनेकशः २०५ कल्पयंतिचतद्विद्याश्चंद्रिका-
भादिमंतिच क्षिपंतिचाग्निसंयोगाद्गोलंलक्षेसुनालगं २०६ नालास्त्रंशोधयेदादौ दद्यात्तत्राग्निचूर्णकं निवेशयेत्तदं
डेन नालमूलेयथादृढं २०७ ततः सुगोलकंदद्यात्ततः कर्णेग्निचूर्णकं कर्णचूर्णाग्निदानेन गोलंलक्षेनिपातयेत्
२०८ लक्ष्यभेदीयथाबाणो धनुर्ज्याविनियोजितः भवेत्तथातुसंधायद्विहस्तश्चशिलीमुखः २०९ अष्टास्त्रापृथु
बुध्नातुगदाहृदयसंमिता पट्टीशात्मसमोहस्तबुध्नश्चोभयतोमुखः २१० ईषद्वक्रश्चैकधारोविस्तारेचतुरंगुलः क्षु
रप्रांतोनाभिसमोदृढमुष्टिसुचंद्ररुक् २११ खड्गः प्रासश्चतुर्हस्तदण्डबुध्नः क्षुराननः दशहस्तमितः कुंतः फालाग्रः
शंकुबुध्नकः २१२ चक्रंषड्हस्तपरिधिः क्षुरप्रांतंसुनाभियुक् त्रिहस्तदण्डस्त्रिशिखोलोहरज्जुः सपाशकः २१३
गोधूमसंमितस्थूलपत्रंलोहमयंदृढं कवचंसाद्विशिरस्त्राणमूर्ध्वकायविशोभनं २१४ योवैसुपुष्टसंभारस्तथाषड्गु-
णमंत्रवित् बह्वस्त्रसंयुतोराजायोद्धुमिच्छेत्सएवहि २१५ अन्यथादुःखमाप्नोतिस्वराज्याद्भ्रश्यतेपिच उपासना
स्थेस्तवकेचास्त्रविद्यामयेरिता २१६ अथशास्त्रप्रसंगेनकौरवसेनायांसशास्त्रपुरुषवर्णनं महाभारतेउद्योगपर्वणि
नरहस्तिरथाश्वानां सारमध्यंचफल्गुच सर्वेष्वेतेष्वनीकेषुसंदिदेशनराधिपः २१७ सानुकर्षाः सतूणीराः सवरू-
थाः सतोमराः सोपासंगाः सशक्तीकाः सनिषंगाः सहृष्टयः २१८

नष्टस्य प्रतिसमाधानार्थं यद्रथस्याधो दारु बध्यते तत्
नुर्षो रथाधस्स्थदारुणीति मेदिनी । तूणीरो रथत्राह्यो बाणकोशः महान् निषंग इतियावत् वरूथं रथगुप्तिः व्याघ्रादि-चर्ममयी तोमराः हस्तक्षेप्याः सश

त्याः दंडाः उपासंगः हयगजवाहास्तूणः निषंगः।पत्तिवाहाः सएव शक्तिर्लोहदण्डः। ऋष्टिर्गुरुतरः काष्ठदण्डः २१८ शरासनतोमराः धनुःप्रक्षेप्यास्तोमराः स्थूलबाणाः। पाशाः समीपागतस्य गले प्रक्षेपार्थं।परिच्छदा आस्तरणादीनि परिस्तरा इतिपाठे आस्तरणमेव २१९ कचग्रहविक्षेपः कचेषु गृहीत्वा येनशत्रुर्विक्षिप्यते तादृशः करुविंकग्रहतुल्यं चिक्कणद्रव्यांतितायोदण्डविशेषः करग्रहेतिपाठे अंकुशविशेषः ।तैलादयः प्रतप्ताः शत्रूणामुपरिक्षिप्यंते सात्रीविषघटाः ससर्पाः कुंभाः। सर्जरसरालद्रव्यं अग्न्युद्दीपकं २२० सघंटानि फलानि शल्याग्राणि येषांते सघंटाफलकाः। घंटासहितंचर्मेत्यन्ये अयांसि खड्गपट्टिशक्षुरकादीनि। गुडजलंतप्तं। उपलाः क्षेप्याः गोलाः। शालतेकत्थतेशब्दंकरोतीति शालः सचासौ भिंदिपालो गोफलकः सभूले

सध्वजाःसपताकाश्चसशरासनतोमराः रज्जुभिश्चविचित्राभिःसपाशाःसपरिस्तराः २१९ सकचग्रहविक्षेपाःसतैलगुडवालुकाः सात्रीविषघटाःसर्वेससर्जरसपांसवः २२० सघंटफलकाःसर्वेसायोगुडजतूपलाः सशूलाभिंदिपालाश्चसमधूच्छिष्टमुद्गरा २२१ सकांडदंडकाःसर्वेसंशीरविषतोमराः सशूर्पपिटकाःसर्वेसदात्रांकुशतोमराः २२२ सकीलककचाःसर्वेवासीवृक्षादनान्विताः व्याघ्रचर्मपरीवाराद्वीपिचर्मावृताश्चते २२३ सहर्ष्टयःसशृंगाश्चसप्रासविविधायुधाः सकुठाराःसकुद्दालाःसतैलक्षौमसर्पिषः २२४

तिगोडपाठः मधूच्छिष्टंमदनं तदपि द्रवीकृत्य गुडजलवत्प्रक्षेप्यं। मुद्गरः मुसलतुल्योदण्डः २२१ कांडंबाणफलकंतयुक्तो दण्डः काण्डदण्डः कंटकदंड इतियावत् दन्तकण्टकइतिपाठे पिसएवार्थः। सीरंलांगलं विषं प्रसिद्धं तेनयुक्तास्तोमरा विषतोमराः। शूर्पाणि तप्तगुडादिप्रक्षेपार्थानि पिटकास्तदाश्रयामंजूषाः। अस्त्राण्यपि बहिर्निरोधनाय दात्रं परशुप्रभृति अंकुशतोमराः बदरीकण्टकतुल्य लोहकण्टको पेतास्तोमराः येषामंतःप्रविष्टानांबहिर्निःसारणे अंत्राण्यपि बहिर्निःसरंति २२२ कीलककचवान् हिंपरेण भुषिपुद्धेजेतुमशकाः ।सकीलककचा इतिपाठे सदंतंकरपत्रंयावत् स्याकाष्ठंपाटयति वाशाकाष्ठप्रच्छत्रशस्त्रंवास्यंवासीतिपाठेपिसएवार्थः। वृक्षादनः लोहकण्टकः कीलकादीन्युपकरणानि व्याघ्रचर्मणा द्वीपी चित्रव्याघ्रस्त

चर्मणाचपरिवृतारथाएव २२३ ऋष्टिः द्रविडेषु प्रसिद्धं हस्तक्षेप्यं वक्रंकाष्टफलकं शृंगसाइचर्यात्। शृंगं गदापातेननष्टस्य रक्तस्यमोक्षणार्थं
विण्मूत्रोत्सर्जनस्थानंवा प्रासाः भल्लाः। तैकक्षौमानि तैलाक्तवस्त्रविशेषा येषांभस्म प्रहारस्थले दीयते सर्पिश्च पुरातनंतदर्थमेव २२५ २
२५ साङ्कर्षा इत्यादीनि चित्राणामनीकानां विशेषणानि विनिवेशितायेषुरथेष्विति शेषः २२६ बद्धानि अरिष्टानि अम्युभहराणि यंत्रौषधानी
नियेषुतेबद्धारिष्टाः रिष्टंक्षेमाशुभाभावेभ इतिमेदिनी। बद्धकक्षाः बद्धस्पर्द्धापदानिस्तुरगादिशिरसि घंटामालामौक्तिगुच्छादीनिअतिशौर्यापद्योतानि विरु

रुक्मजालप्रतिछन्नानानामणिविभूषिताः चित्रानीकाः सुवपुषोज्वलिताइवपावकाः २२५ तथाकवचिनः शूराः शस्त्रेषुकृ
तनिश्रमाः कुलीनाहययोनिज्ञाः सारथ्येविनिवेशिताः २२६ बद्धारिष्टाबद्धकक्षाबद्धध्वजपताकिनः बद्धाभरणनिर्व्यूहाब
द्धचर्मासिपट्टिशाः २२७ चतुर्युजोरथाःसर्वेसर्वेचोत्तमवाजिनः सप्रासऋष्टिकाःसर्वेसर्वेशतशरासनाः २२८ धुर्ययोर्हययोरे
कस्तथान्यौपार्ष्णिसारथी तावपिरथिनांश्रेष्टौरथीचहयवित्तथा २२९ नगराणीवगुप्तानिदुराधर्षाणिशत्रुभिः आस
न्नयसहस्राणिहेममालीनिसर्वशः २३० यथारथास्तथानागाबद्धकक्षाःस्वलंकृताः बभूवुःसमपुरस्थारत्नवेतद्र
वाहयः २३१ द्वावंकुशधरौतेत्रद्वावुत्तमधनुर्धरौ द्वौवरासिमध्योराजन्नेकःशक्तिपिनाकधृक् २३२ गजैर्मत्तैःसमा
कीर्णंसर्वसायुधकोषकैः तद्बभूवबलंराजन्कौरव्यस्यमहात्मनः २३३ अथग्रंथालंकारः श्रीमद्राजसनेयिगौतम
कुलोत्पन्नोतिविद्यावतांमान्योगुर्जरपण्डितोपपदकौदीच्यःसहस्राद्धकः ज्योतिःशास्त्रविशारदोतिमतिमान्श्रीव्यं
कटाख्योद्विजस्तज्ज्ञोहंहरिकृष्णसंज्ञकइमंचक्रेविदांप्रीतये २३४

रुदीनियेषुबद्धानिआभरणानिक्षुद्रघण्टिकादीनिनिर्व्यूहाः शिरस्राणि चयेषुतानिर्व्यूहाः शिरव
रेद्धाइतिमेदिनी २२७ २२८ चतुर्युज इत्येतद्व्याचष्टे धुर्ययोरिति धुर्ययोः धूःसन्निहितयोः पार्ष्णिसारथीचक्ररक्षौ २२९ २३० २३१ अंकुशधरौगजनि
यंतारौ उत्तमधनुर्धरौदूरस्थान्प्रहर्तुं असिधरौ समीपस्थान् शक्तिपिनाकधरौमध्यस्थान्पिनाकस्त्रिशूलं। पिनाकोस्त्रीरुद्रचापेपांशुवर्षत्रिशूलयोरितिमेदिनी
२३२ २३३ २३४

दक्षिणेसुमहाराष्ट्रदेशेचनगरंबृहत् औरंगाबादसंज्ञंवैतत्रचास्ति जनिर्मम २३५ प्रार्थयेसर्वविबुधांक्षमध्वंमेऽपराधकं यद्यत्रकुकृतंचास्या दधिकंयत्रकुत्रचित् २३६ रागमुत्सृज्यतत्सर्वंनिर्मलंकुरुतादरात् अत्रावशिष्टोयोभागःसतुशेषेभविष्यति २३७ इतिश्रीत्र्यंकटरामात्मकहरिकृष्णविनिर्मितेबृहज्ज्योतिषार्णवेषष्ठेमिश्रस्कंधेशस्त्रलक्षणनिरूपणंनामसप्ततितमोध्यायः ७० अथाग्रेप्रतिमालक्षणध्या

अथशस्त्रलक्षणाध्यायविषयानुक्रमणिका